

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रं. ६.४

१८

अथतत्वानुसंधानप्रारंभः

Acc. No. ~~211~~ M-1838
title - तत्त्वानुसंधान.
Author - Svayam Prakashananda Sarasvati
Date - ?
Subject - वेदान्त.
folio - 75.
Xerox - 148

K K S U LIBRARY
RAMTEK
441 106
M-1838
Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥

॥ १ ॥

श्रीगणेशाय नमः ॥ श्रीसच्चिदानंदमूर्तये नमः ॥

॥ ब्रह्माहं यत्प्रसादेन मयि विश्वं प्रकल्पितं ॥ श्रीमत्त्व
यं प्रकाशाख्यं प्रणौमि जगतां गुरुं ॥ १ ॥ देहो नाहं श्रो
त्रवागादिकानि नाहं बुद्धि र्नाहमध्यासमूलं ॥ नाहं स
त्यानंदरूपश्चिदात्मा मायासाक्षीरूप्याएवाहमस्मि
॥ २ ॥ अथ मोक्षस्य वाक्यार्थज्ञानाधीनत्वात्तस्य च प
दार्थज्ञानाधीनत्वात्तदर्थं तत्पदार्थं निरूपयामः ॥ त
त्पदार्थस्य च लक्षणं द्विविधं ॥ तटस्थलक्षणं स्वरूप

॥ १ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्षणं चेति सृष्टिस्थितिलयकारणत्वं तटस्थलक्षणं
॥ यतो वा इमानि भूतानि जायंते ॥ येन जातानि जीवंति
॥ यत्प्रयंत्यभिसंविशंतीति श्रुतेः ॥ तदुक्तं भगवता सू
त्रकारेण जन्माद्यस्य यत इति सत्यज्ञानानंदलक्षणः
॥ स्वरूपलक्षणं ॥ सत्यं ज्ञानमनंतं ब्रह्म ॥ आनंदो ब्रह्मे
ति व्यजानात् इत्यादिश्रुतेः ॥ उक्तं चानंदादयः प्रधा
नस्येति ॥ स च पदार्थो द्विविधः ॥ वाच्यार्थो लक्षणार्थ
श्चेति ॥ मायोपहितचैतन्यं तत्पदवाच्यार्थः ॥ माया
निर्मुक्तं चैतन्यं तत्पदलक्ष्यार्थः ॥ अथ केयं मायो[illegible]

3

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥ यथाशुक्त्यादौरजतादिकल्पितंतथाचेतने॥चेतनं
॥२॥ कल्पितं॥इदंसर्वंयदयमात्मा॥आत्मैवेदंसर्वंब्रह्मैवे
दंसर्वं॥पुरुषएवेदंसर्वं॥सर्वंखल्विदंब्रह्म॥वासुदे
वःसर्वं॥नारायणःसर्वंपुराणइत्यादिश्रुतिस्मृति
वाक्यशतैः॥अचेतनस्यचेतनव्यतिरेकेणभाव
प्रतिपादनाच्चेतनाचेतनयोरभेदाद्योगाच्चचेतनं
नित्यशुद्धबुद्धमुक्तसत्यपरमानंदाद्वयंब्रह्म॥अचे
तनमज्ञानादिजडजातं॥अज्ञानंत्रिगुणात्मकंस ॥२॥
दसद्भ्यामनिर्वचनीयंभावरूपंज्ञाननिवर्त्यं॥अहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ब्रह्म न जानामीत्यनुभावात् ॥ देवात्मशक्तिं स्वगुणै
र्निगूढामित्यादिश्रुतेः ॥ अज्ञानेनावृतं ज्ञानं तेन
मुह्यंति जंतवः ॥ ज्ञानेन तु तदज्ञानं येषां नाशितमा
त्मन इति स्मृतेश्च ॥ तच्चाज्ञानं द्विविधं ॥ माया अवि
द्याभेदात् ॥ शुद्धसत्वप्रधानं सन्मायेत्युच्यते ॥ म
लिनसत्वप्रधानं सदविद्येत्युच्यते ॥ जीवेशावाभा
सेन करोति माया चाविद्या च स्वयमेव भवतीति
श्रुतेः ॥ अथवा ज्ञानशक्तिर्द्विविधा ज्ञानशक्तिः ॥
क्रियाशक्तिश्चेति ॥ रजस्तमोभ्यामनभिभूतं सत्वं
ज्ञानशक्तिः ॥ सत्वात्संजायते ज्ञानमिति स्मृतेः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥
॥२॥

क्रियाशक्तिर्द्विविधा आवरणशक्तिर्विक्षेपशक्तिश्चे
ति॥ रजःसत्वाभ्यामनभिभूतं तम आवरणशक्तिः
तदुक्तं कृष्णं तम आवरणात्मकत्वादिति सा च नास्ति
न प्रकाशत इति व्यवहारहेतुः॥ तथा चोक्तं नाभाति
नास्ति कूटस्थ इत्यापादनमावृतिरिति॥ तमःसत्वा
भ्यामनभिभूतं रजो विक्षेपशक्तिः॥ रजसो लोभ ए
व चेति स्मृतेः॥ लोभादीनां विक्षेपत्वं प्रसिद्धमेव सा
चाकाशादिप्रपंचोत्पत्तिहेतुः॥ उक्तं च॥ विक्षेपशक्ति
र्लिंगादिब्रह्मांडांतं जगत्सृजेदिति॥ तथा च पूर्वो

॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्ताज्ञानमावरणशक्तिप्रधानं मदविद्येत्युच्यते। ज्ञा
नविक्षेपशक्तिप्रधानं सन्मायेत्युच्यते। एतदभि
प्रायास्मृतिरपि तरत्यविद्यां विततां हृदि यस्मिन्नि
वेशिते। योगी माया मेये या यस्मै मायात्मने नम
इत्येवं रूपा द्रष्टव्या। एवं मायोपहितं चैतन्यमीश्व
रो जगत्कारणमंतर्यामीत्युच्यते। स एव तत्पदवा
च्यार्थः। अविद्योपहितं चैतन्यं जीवः प्राज्ञ इति
चोच्यते। तदुक्तं। तमोरजःसत्वगुणा प्रकृतिर्द्विवि
धा च सा। सत्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ रा० ॥
॥ ४ ॥

मायाबिंबो वशीकृत्य तांस्यात्सर्वज्ञ ईश्वरः ॥ अवि
द्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधेति ॥ अस्मान्मा
यीसृजते विश्वमेतत्तस्मिंश्चान्यो मायया सन्निरु
द्धः ॥ मायीतु प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्ये
वमादिश्रुतयउक्ताभिप्रायाद्रष्टव्याः ॥ यथैक एव
यज्ञदेवदत्तः ॥ क्रियानिमित्तवशेन पाचको पाठ
क इति व्यपदिश्यते तथैकमेवाज्ञानं विक्षेपावरण
शक्तिनिमित्तभेदेन मायाविद्येति च व्यपदिश्यते
॥ तथा चाविद्याप्रतिबिंबतं चैतन्यं जीवो विद्योप

॥ ४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हितं बिंबचैतन्यमीश्वरः। आभास एव। अत एवो
पमा सूर्यकादिवत्। यथाह्ययं ज्योतिरात्मा विवस्वा
नपोभिन्ना बहुधैकोनुगच्छन् उपाधिना क्रियते भे
दरूपो देवः क्षेत्रेष्वेवमजोयमात्मा। एक एव हि भूता
त्मा भूते भूते व्यवस्थितः। एकधा बहुधा चैव दृश्यते
जलचंद्रवदित्यादिश्रुतिस्मृत्योः सत्वात्। अस्मि
न्पक्षे जीवस्त्वेक एव। तस्मिनेतःकरणाविशिष्टाः
प्रमातारः कल्पिताः। केचित्तु नानाज्ञानं स्वीकृत्य
वनवदज्ञानसमुदायः। समष्टिस्तदुपहितं चैतन्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ५ ॥

मीश्वरः ॥ इस्सवृक्षस्येकमज्ञानं व्यष्टिः ॥ तदुपहितं चैत
न्यं प्राज्ञ इति वदंति ॥ अन्ये तु ॥ कारणीभूताज्ञानोपहि
तं चैतन्यमीश्वरः ॥ अंतःकरणोपहितं चैतन्यडुरी
यः ॥ कार्योपाधिरयं जीवः ॥ कारणोपाधिरीश्वर इति
वचनादित्याहुः ॥ सर्वव्यापिमायोपहितं चैतन्यमीश्व
रः ॥ सर्वज्ञानशक्त्युपहितस्वरूपेणाजगत्कर्ता ॥ विक्षे
पादिशक्तिमदज्ञानोपहितस्वरूपेणाजगदुपादनमू
र्णनाभिवत् ॥ यथोर्णनाभिः सृजते गृह्णते चेत्यादि ॥ ५ ॥
श्रुतेः ॥ सोयः सर्वज्ञः स विश्वकृत्स हि विश्वः सकर्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यादिश्रुतिभ्यः॥ एष पूर्वोक्तादीश्वरादाकाशमुत्पद्य
ते आकाशाद्वायुर्वायोरग्निरग्नेरापोभ्यः पृथिवी च
॥ आत्मन आकाशः संभूत इत्यादिश्रुतेः॥ मायायाः
सत्वरजस्तमोगुणात्मकत्वात्तत्कार्याण्याकाशादि
नित्रिगुणात्मकानि॥ अपंचीकृतानि सूक्ष्मभूतानी
ति च वर्णयंति॥ एतेभ्यः सूक्ष्मभूतेभ्यः स्थूलभूतानि
सूक्ष्मशरीराणि सप्तदशलिंगात्मकानि जायंते॥ सप्त
दशलिंगानि तु ज्ञानेंद्रियाणि पंच कर्मेंद्रियाणि पंच
मनो बुद्धिः पंच प्राणाश्चेति॥ तथा चाकाशादिसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥
॥६॥

त्विकांशेभ्यो व्यस्तेभ्यो ज्ञानेंद्रियाण्युत्पद्यंते ॥ तथाह्याका
शसात्विकांशाछ्रोत्रमुत्पद्यते वायोः सात्विकांशात्वगिं
द्रियं तेजसः सात्विकांशाच्चक्षुरपां सात्विकांशाद्रसनं
पृथिवीसात्विकांशाघ्राणं श्रोपामाकाशादित्यादिश्रु
तेः ॥ आकाशादीनां सात्विकांशेभ्यो मीलितेभ्योंतःक
रणमुत्पद्यते ॥ तच्च संकल्पविकल्पनिश्चयाभिमानानु
संधानरूपवृत्तिभेदाच्चतुर्विधं ॥ मनो बुद्धिरहंकारश्चि
त्तं चेति चतुर्विधं ॥ संकल्पाख्यं मनोरूपं बुद्धिर्निश्चय
रूपिणी ॥ अभिमानात्मकस्तद्वदहंकारः प्रकीर्तितः ॥

॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनुसंधानरूपं च चित्तमित्यभिधीयत इति वार्तिकवच
नात्। पूर्वोक्ताकाशादिराजसांशेभ्यो व्यस्तेभ्यः कर्मे
न्द्रियाणि वाक्पाणिपादपायूपस्थाख्यानि क्रमेणो
त्पद्यंते। वाक्पाणिपादपायूपस्थानि कर्मेंद्रियाणि
तेषां क्रमेणेति श्रुतेः। आकाशराजसांशाद्वागिंद्रि
यमुत्पद्यते। वायो राजसांशात्हस्तौ। तेजसो राजसां
शात्पादौ। अपां राजसांशात्पायुः। पृथिवीराजसांशा
दुपस्थं। आकाशादिराजसांशेभ्यो मीलितेभ्यः प्राणा
उत्पद्यते। सोपि वृत्तिभेदात्पंचविधः। प्राणमनवान्ना

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥
॥७॥

साग्रवर्ती प्राणः॥ आवागमनवान्गुदस्थानवर्त्यपानः
॥ विष्वग्गमनवान्सर्वशरीरवर्ती व्यानः॥ ऊर्ध्वगमन
वान्कंठवर्त्युदानः॥ अशितपीतान्नपानादिसमीक
रणकरोखिलशरीरवर्ती समानः॥ अन्नमयप्राणम
यमनोमयविज्ञानमयाः पंचकोशा अत्रैवांतर्भवं
ति॥ वक्ष्यमाणस्थूलशरीरमन्नमयः कोशः॥ उक्तं सूक्ष्म
शरीरं कोशत्रयात्मकं कर्मेंद्रियैः सहितः प्राणः प्राण
मयः कोशः॥ कर्मेंद्रियैर्ज्ञानेंद्रियैर्वा सहितं मनो मयः ॥७॥
कोशः॥ ज्ञानेंद्रियैः सहिता बुद्धिर्विज्ञानमयः कोशः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयमेव कर्तृत्वोपाधिः॥ विज्ञानं यज्ञं तनुत इत्यादि श्रु
तेः॥ अंतःकरणस्य सत्ववृत्तिर्द्विविधा॥ निश्चयवृत्तिः
सुखाकारा वृत्तिश्चेति॥ निश्चयवृत्तिमदंतःकरणं बु
द्धिरित्युच्यते॥ सुखाकारवृत्तिमदंतःकरणं भोक्तृत्वो
पाधिः॥ तस्य प्रियमेव शिरः॥ मोदो दक्षिणः पक्ष इ
त्यादि श्रुतेरयमेव कारणपर्यंत आनंदमयः कोशः
केचित्तु॥ अज्ञानमानंदमयकोशं वदंति॥ इदं सूक्ष्म
शरीरं सप्तदशलिंगं द्विविधं समष्टिव्यष्टिभेदात्॥
अपंचीकृतपंचमहाभूततत्कार्यं सप्तदशलिंगे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ८ ॥

समष्टिरित्युच्यते ॥ एतदुपहितं चैतन्यं हिरण्यगर्भः प्रा
णः सूत्रात्मेति चोच्यते ॥ ज्ञानक्रियाशक्त्युपहितत्वा
द्व्यापित्वाच्च ॥ अथवा पूर्वोक्ताः पंचीकृतेभ्यः सर्वव्याप
कं लिंगशरीरं पृथगेवोत्पन्नं ॥ तदेव सूक्ष्मसमष्टिरित्युच्य
ते ॥ समष्टित्वं नाम गोत्रत्वादिवत्सर्वत्र व्याष्टिष्वनुस्यू
तत्वं ॥ तदुक्तं ॥ तेभ्यः समभवत्सूत्रं लिंगं सर्वात्मकं
महदिति ॥ केचित्तु वनवल्लिंगसमुदायः सूक्ष्मसमष्टिरि
ति वदंति ॥ प्रत्येकं लिंगशरीरं व्यष्टिरित्युच्यते ॥ व्यष्टि

॥ ८ ॥

त्वं नाम व्यक्तिव्यावृत्तत्वं ॥ एतदुपहितं चैतन्यं तैजस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इत्युच्यते ॥ तेजोमयांतःकरणोपाधित्वात् ॥ सामान्य
विशेषयोरिवजातिव्यक्त्योरिव च समष्टिव्यष्ट्योस्तादा
त्म्यात्तु पराग मात्तउपहितयोस्तैजससूत्रात्मनोर
पितादात्म्य ॥ एतदेव सूक्ष्मशरीरमविद्याकामकर्मस
हितं पुर्यष्टकमित्युच्यते ॥ ज्ञानेंद्रियपंचकं कर्मेंद्रि
यपंचकमंतःकरणचतुष्टयं प्राणादिपंचकं भूत
सूक्ष्मपंचकमविद्याकामःकर्म चेत्येतान्यष्टौ ॥ तदाह
कर्मेंद्रियाणि खलु पंच तथा पराणि बुद्धींद्रियाणि
मन आदि चतुष्टयं च ॥ प्राणादिपंचकमथो वियदादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ६ ॥

पंचकामश्चकर्मचतमः पुनरष्टमीयः इति ॥ तत्र
कार्याविद्याद्रष्टव्यासा चतुर्विधा ॥ अनित्येनित्य
बुद्धिरशुचौशुचित्वबुद्धिर्दुःखेसुखबुद्धिरना
त्मन्यात्मबुद्धिश्चेति ॥ तदुक्तं ॥ अनित्याशुचिदुःखा
नात्मसुनित्यशुचिसुखात्मख्यातिरविद्येति ॥ अ
स्यार्थः ॥ अनित्येब्रह्मलोकादिसंसारफलेनित्यत्व
बुद्धिरेकाविद्याद्रष्टव्या ॥ अशुचिषुस्वशरीरपुत्रभा
र्यादिशरीरेषुशुचित्वबुद्धिरपरा ॥ दुःखेदुःखसाध
नेषुचसुखतत्साधनबुद्धिरन्या ॥ अनात्मनिदेहे

॥ ७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रियादिष्वहमित्यात्मबुद्धिरितितराचेत्यविद्याच
तुर्विधा ॥ कामोरागः ॥ कर्मत्रिविधंसंचितमागामि
प्रारब्धंचेति ॥ कृतंकर्मफलमदत्वाऽदृष्टरूपेणावि
द्यमानंसंचितंकर्म ॥ यथासंध्यावंदनाग्निहोत्रादि
संकल्पादिभिरारब्धमपरिसमाप्यमागामिकर्म
॥ शरीरारंभकंप्रारब्धंकर्म ॥ संचितागामिकर्म
णोः फलभोगेनवाविरोधिकर्मांतरेणवाब्रह्म
ज्ञानेनवाविनाशः ॥ प्रारब्धस्यतुभोगेनैवनाशः
किंबहुना प्रारब्धव्यतिरिक्तानामविद्यादीनांपं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥
॥१०॥

चक्लेशानां तत्त्वज्ञानान्नाशः॥ तथाहि॥ अविद्यास्मि
तारागद्वेषाभिनिवेशाः पंचक्लेशाः॥ कार्यकारण
रूपाद्द्विविधाविद्यानिरूपिता॥ अहंकारस्य सूक्ष्मा
वस्थाऽस्मिता॥ इदमेव महत्तत्त्वं सामान्याहंकार इति
चोच्यते॥ राग उक्तः॥ द्वेषः क्रोधः॥ स्वीकृतस्य पुनस्त्या
गासहिष्णुत्वमभिनिवेशः॥ एतेषां पंचानां ब्रह्मसा
क्षात्कारान्निवृत्तिः॥ ज्ञात्वा देवं मुच्यते सर्वपाशैरि
त्यादिश्रुतेः॥ पाशैः पंचक्लेशैरित्यर्थः॥ तिष्ठतु ता
वल्लासंगिकं॥ एवं सूक्ष्मशरीरोत्पत्तिर्निरूपिता॥

॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचीकृतभूतानि स्थूलभूतानि॥ पंचीकरणं तु पूर्वो
क्तानामाकाशादीनां तामसांशानेकैकं द्विधा विभ
ज्य तेष्वेकं पुनश्चतुर्धा विभज्य स्वांशं परित्यजेतरा
शेषु योजनमेवमवशिष्टानां॥ तासां त्रिवृतमेकै
कां करवाणीति त्रिवृत्करणश्रुतेः पंचिकरणस्या
प्युपलक्षणत्वात्पंचीकरणं प्रामाणिकमेव वैशेष्या
त्तद्वादस्तद्वाद इति न्यायेन स्वांशभूयस्त्वाद्विशेष्यव्यपदेशो
पि संभवति॥ एवं च सत्याकाशे शब्दोभिव्यज्यते वायो
शब्दस्पर्शौ तेजसि शब्दस्पर्शरूपाणि जले शब्दस्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ न० ॥
॥ ११ ॥

शीरूपरसाः पृथिव्यां शब्दस्पर्शरूपरसगंधाः ॥ तथा
पंचीकृतपृथिव्याः ब्रह्मांडसमुत्पन्नं तदंतर्वर्तिलो
काश्चतुर्दश ॥ ब्रह्मांडान्मनुष्यास्तद्रूपे जाते ब्रह्मांडां
तर्वर्तिपृथिव्या ओषधय उत्पन्ना ओषधिभ्योन्नं त
त्पितृभ्यां भुक्तान्नपरिणामे रेतः शोणितं तद्द्वारा स्थूल
शरीरमुत्पन्नं ॥ तच्च चतुर्विधं ॥ जरायुजमंडजं स्वेदजमु
द्भिज्जं चेति मनुष्यादिशरीरं जरायुजं पक्षीपन्नगादि
शरीरमंडजं यूकादिशरीरं स्वेदजं तृणगुल्मादिशरीर
मुद्भिज्जं उक्तं स्थूलशरीरं पुनः प्रकारांतरेण द्विविधं ॥

॥ ११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समष्टिव्यष्टिभेदात् ॥ पंचकृतपंचमहाभूततत्कार्य
ब्रह्मांडं तदंतर्वर्तिकार्यं सर्वं समष्टिरित्युच्यते ॥ अथ
वा व्यक्तिषु गोत्वादिवत्सर्वव्यष्टिष्वनुस्यूतं पंचीकृत
भूतकार्यब्रह्मांडात्मकं व्यापकं समष्टिः ॥ वनवत्सक
लस्थूलशरीरसमुदायो वा समष्टिरित्युच्यते ॥ एतदु
पहितं चैतन्यं विराड्वैश्वानर इति चोच्यते ॥ विविधं रा
जमानत्वात् सर्वनराभिमानत्वाच्च ॥ प्रत्येकं स्थूलशरी
रं गवादिवद्व्यावृत्तं व्यष्टिरित्युच्यते ॥ एतदुपहितं चैत
न्यं विश्व इत्युच्यते ॥ सूक्ष्मशरीरमपरित्यज्य स्थूलश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥ ॥१२॥

रीरंप्रविष्टत्वात् ॥ अनयोः ॥ समष्टिव्यष्ट्योः योः सामा
न्यविशेषयोरिव तादात्म्यात् ॥ एतदुपहितविश्ववैश्वा
नरयोरपि तादात्म्य ॥ एक एव जीवः जाग्रदवस्थायां
स्थूलसूक्ष्मकारणाविद्याभिमानीसन्विश्व इत्युच्य
ते ॥ स एव स्वप्नावस्थायां सूक्ष्मशरीरकारणाविद्या
भिमानीसं तैजस इत्युच्यते ॥ स एव सुषुप्तौ कारणा
विद्याभिमानीसन्प्राज्ञ इत्युच्यते ॥ स एव शरीरत्रया
भिमानरहितः सन्शुद्धः परमात्माभवति ॥ तस्यैवा
भिमानिनो जीवस्यावस्थाः पंच ॥ जाग्रत्स्वप्नसुषुप्ति

॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूर्छ्छामरणाभेदात॥ दिगाद्यधिष्ठानदेवतानुग्रहीतैरिं
द्रियैः शब्दादिविषयानुभवावस्था जाग्रदवस्था॥ जा
ग्रद्भोगप्रदकर्मोपरमे सतीन्द्रियोपरमे जाग्रदनुभव
संस्कारोद्भूतं विषयतज्ज्ञानावस्था स्वप्नावस्था॥ जा
ग्रत्स्वप्नोभयभोगप्रदकर्मोपरमेण स्थूलसूक्ष्मशा
रीराभिमाननिवृत्तिद्वाराविशेषविज्ञानोपरमात्मि
काबुद्धेः कारणात्मनावस्थितिः सुषुप्तिः॥ मुद्गरप्रह
रादिजनितविषादनुविशेषविज्ञानोपरमावस्थामू
र्छावस्था॥ तदुक्तं मुग्धेर्धसंपत्तिः परिशेषादिति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥१२॥

एतच्छरीरभोगप्रापककर्मोपरमेणाद्विविधदेहाभिमानिन वृत्त्या संपिंडितकरणग्रामावस्थाभाविशरीरप्राप्तिपूर्वतं मरणावस्था॥ केचित्तु अस्या उक्तावस्थास्वतभावं वदंति॥ अत्र श्रुतिस्मृतिपुराणानि प्रसिद्धानि॥ एवमेक एवात्मा समष्टिस्थूलसूक्ष्मशरीरतत्कारणमायोपहितः सन्वैश्वानर इत्युच्यते॥ अहमेव वैश्वानरोस्मीत्येतदुपासनया तत्प्राप्तिः फलं भवति॥ वैश्वानराधिकरणे सूत्रकारभाष्यकाराभ्यां श्री त्यर्थस्य तथा प्रतिपादनात्॥ स एव परमात्मा समष्टि

॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सूक्ष्मशरीरं तत्कारणमायोपहितः सन् हिरण्यगर्भ इ
त्युच्यते ॥ एतदुपासनया तत्प्राप्तिः फलं भवति ॥ अंत
र उपपत्तेरित्यधिकरणे सूत्रभाष्याभ्यामुपकोसल
विद्यायां तथैव प्रतिपादनात् ॥ स एव केवलमायोपा
धिकः सन्नीश्वर इत्युच्यते ॥ तदुपासनया तत्प्राप्तिः
फलं भवति ॥ सर्वत्र प्रसिद्धोपदेशादिति शांडिल्यवि
द्यायां दहर उत्तरेभ्य इति दहरविद्यायां सूत्रभाष्याभ्यां
यथोक्तेश्वरोपासनया तत्प्राप्तेः प्रतिपादनात् तथा
यथोपासते तथैव भवतीश्रुतेः ॥ भावनामाद्येतत्तार

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥१४॥

तम्येनसार्ष्टिसारूप्यसामीप्यसालोक्यफलानिभवंति
साम्नः सायुज्यसलोकतांजयतीत्यादिश्रुतेः। येषु
नः साधनचतुष्टयसंपन्नाविचारासमर्थामंदप्रज्ञा
स्तेषांगुरुमुखाद्ब्रह्मनिश्चित्यसर्वोपाधिविनिर्मुक्तं
सच्चिदानंदलक्षणंब्रह्माहमस्मीतिनिर्गुणब्रह्मोपा
सनयास्मिन्नेवशरीरेजीवदवस्थायांमरणावस्थायां
वाब्रह्मलोकेवाउत्पन्नब्रह्मसाक्षात्कारेणतन्मुक्तिः
फलंभवति। श्रुतिन्यायसाम्यात्। ओमित्येतेनैवा
क्षरेणपरंपुरुषमभिध्यायीतसएवतस्माज्जीवघ

॥१४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नात्परात्परं पुरुषमीक्षते॥ ॐमित्यात्मानं युंजीत॥
ॐमित्येवं ध्यायथात्मानमित्यादिश्रुतिभ्यः॥ भगव
ताप्युक्तं॥ ॐमित्येकाक्षरं ब्रह्मव्याहरन्मामनुस्मर
न्। यः प्रयाति त्यजन्देहं स याति परमां गतिमिति॥
अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते॥ तेपि चा
तितरंत्येव मृत्युं श्रुतिपरायणा इति च॥ एवं तत्प
दार्थस्य मायोपहितस्य ब्रह्मणस्तटस्थलक्षणं
जगज्जन्मादिकारणत्वं निरूपितं॥ अयमेवाध्यारो
प इत्युच्यते॥ अस्यापवाद इदानीमुच्यते॥ अपवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ १५ ॥

रोनामाधिष्ठाने भ्रांत्या प्रतीतस्य तद्व्यतिरेकेणा
भावनिश्चयः॥ अयमेव बाधो विलापनमिति चो
च्यते॥ स च बाधस्त्रिविधः शास्त्रीयो योक्तिको प्रा
त्यक्षश्चेति॥ अथात आदेशो नेति नेति नेह नाना
स्ति किंच नेत्यादि शास्त्राद्ब्रह्म व्यतिरेकेण प्रपंचा
भावनिश्चयः शास्त्रीयो बाधः॥ तद्व्यतिरेकेणा
खिलप्रपंचाभावं निश्चित्य दृश्यमानस्य मिथ्या
त्वेन ब्रह्मात्ममात्रत्वनिश्चयो योक्तिको बाधः
अहं ब्रह्मास्मीति तत्त्वमस्यादि वाक्यजन्य साक्षा

॥ १५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्कारेयाज्ज्ञानतत्कार्यनिवृत्तिः प्रत्यक्षबाधः ॥ यौ
क्तिकबाधस्यायं धि क्रमः स्थूलप्रपंचं सर्वमपिस्थू
लभूतेषु विलाप्य तद्व्यतिरेकेण तन्नास्तीति निश्चि
त्य स्थूलभूतानि समष्टिसूक्ष्मशरीरं च सूक्ष्मभूते
षु विलाप्य ॥ तत्रापि पृथिव्यादीनां प्रातिलोम्येना
काशांतं विलाप्याकाशमहंज्ञाने ज्ञानं चिन्मात्रे वि
लापयेत् ॥ तथा च स्मृतिः ॥ जगत्प्रतिष्ठा देवर्षे
पृथिव्यप्सु प्रलीयते ॥ ज्योतिष्यापः प्रलीयंते
ज्योतिर्वायौ प्रलीयते ॥ वायुश्च लीयते व्योम्नि तच्चा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्यक्ते प्रलीयते ॥ अव्यक्तं पुरुषे ब्रह्मन्निष्कले संप्र
लीयत इति ॥ उक्तं च आकारं पुरुषं विश्वमुकारे
प्रविलापयेत् ॥ उकारं तैजसं सूक्ष्मं मकारे प्रविला
पयेत् ॥ मकारं कारणं प्राज्ञं चिदात्मनि विलापयेदि
ति ॥ अस्यामध्यारोपापवादाभ्यां तत्त्वंपदार्थशोध
नमपि सिद्धं भवति ॥ तथाहि मायादिसमष्टिस्तदु
पहितं चैतन्यमेतदाधारानुपहितमखंडचैतन्यं
च तमायःपिंडवदेतत्त्रयमविविक्तमेकत्वेनावभा
समानं तत्पदवाच्योऽर्थो भवति ॥ विविक्तमखंडचै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तन्यं तत्पदलक्ष्योर्थो भवति॥ अविद्यादिव्यष्टिरेत
दुपहितं चैतन्यमेतदाधारानुपहितं प्रत्यक्चैतन्य
मेतत्त्रयं तप्तायःपिंडवदविविक्तमेकत्वेनावभास
मानं त्वंपदवाच्यार्थो भवति विविक्तं प्रत्यक्चैतन्यं त्वं
पदलक्ष्यार्थो भवति॥ एतौ लक्ष्यार्थावुपादाय संबं
धत्रयेणासहितं तत्त्वमसिवाक्यं लक्षणयाखंडार्थ
बोधकं भवति॥ संबंधत्रयं तु पदयोः सामानाधि
करण्यं॥ सामानाधिकरण्यं नामभिन्नप्रवृत्तिनिमि
त्तानां शब्दानामेकस्मिन्नर्थे वृत्तिः॥ यथा सोयं देवद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ११ ॥

तस्यत्रतत्कालविविशिष्टदेवदत्तवाचकसशब्दस्यैत
त्कालविशिष्टदेवदत्तवाचकायंशब्दस्यचैकस्मिन्देव
दत्तपिंडे वृत्तिः सामानाधिकरण्यं ॥ पदार्थयोर्विशेष
णविशेष्यभावः ॥ यथा तत्रैव सशब्दार्थतत्कालवि
शिष्टायंशब्दार्थे तत्कालविशिष्टयोरन्योन्यभेदव्या
वर्तकतया विशेषणविशेष्यभावः ॥ सोयमयंस इ
ति ॥ पदयोरर्थयोर्वाविरुद्धवाक्यार्थेन सह लक्ष्यल
क्षणाभावः ॥ यथा तत्रैव सोयमित्यादिवाक्ये सशब्दा
यंशब्दयोस्तदर्थयोर्वाविरुद्धदेवदत्तपिंडेन वाक्या

॥ ११ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थेन सह लक्ष्यलक्षणाभावः ॥ तथा तत्त्वमस्यादिवाक्ये
तत्त्वंपदयोः परोक्षत्वापरोक्षत्वविशिष्टेश्वरजीववा
चकयोरखण्डचैतन्ये तात्पर्येण वृत्तिः सामानाधिक
रण्यं तथा तत्त्वंपदयोरीश्वरजीवयोरन्योन्यभेदव्या
वर्तकतया तत्त्वमसि त्वं तदसीति विशेषणवि
शेष्यभावः ॥ तत्त्वंपदयोस्तदर्थयोर्वा वाक्यार्थेनाविरु
द्धाखण्डचैतन्येन विरुद्धांशपरित्यागे लक्ष्यलक्षणभा
वः तदुक्तं ॥ सामानाधिकरण्यञ्च विशेषणविशेष्य
ता ॥ लक्ष्यलक्षणभावश्च पदार्थप्रत्यगात्मनामिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ १८ ॥

अस्यार्थस्तूक्त एव ॥ एतदभिप्रायेण वाक्यवृत्तावप्युक्तं
तत्त्वमस्यादिवाक्यं च तादात्म्यप्रतिपादने ॥ लक्ष्यौ तत्त्वं
पदार्थौ द्वावुपादाय प्रवर्तत इति ॥ तादात्म्यप्रतिपादने
अखंडस्य प्रतिपादन इत्यर्थः ॥ संसर्गस्य वा विशिष्टस्य
वा विशिष्टैक्यस्य वाक्यार्थस्य प्रत्यक्षादिविरुद्धत्वेन
तत्त्वमस्यादिवाक्यप्रतिपाद्यत्वायोगात् ॥ अखंडत्वं नाम
विजातीयसजातीयस्वगतभेदशून्यत्वं ॥ सर्वस्य प्र
पंचस्य ब्रह्मव्यतिरिक्तस्य कल्पितत्वेन मिथ्यात्वाद्वि
जातीयभेदशून्यता ॥ जीवपरमात्मनोरत्यंतैक्यात्स

॥ १८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जातीयभेदशून्यता ॥ एकरसत्वात्स्वगतभेदशून्यता
॥ अथवा त्रिविधपरिछेदशून्यत्वमखंडत्वं ॥ विभुत्वा
द्देशापरिछेदशून्यत्वं ॥ नित्यत्वात्कालपरिछेदशून्य
त्वं सर्वात्मकत्वाद्वस्तुपरिछेदशून्यत्वं ॥ वेदाहमेतम
जरं पुराणं सर्वात्मानं सर्वगतं विभुत्वादित्यादिश्रुतेः
॥ यद्वा पर्यायानेकशब्दप्रकाश्यत्वे सत्यविशिष्टत्वम
खंडत्वं ॥ तदुक्तं ॥ अविशिष्टमपर्यायानेकशब्दप्रका
शितं ॥ एकं वेदांतनिष्ठातामखंडं प्रतिपद्यते इति
एवं तत्त्वमस्यादिवाक्यजन्याखंडापरोक्षज्ञानादज्ञान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त० ॥
॥१९॥

निवृत्तिरानंदावाप्तिश्च भवति ॥ अज्ञानासत्वादानंदरूपत्वात् ॥ तदुक्तं ॥ प्रत्यग्बोधाय आभाति सोद्वयानंदलक्षणः ॥ अद्वयानंदरूपश्च प्रत्यग्बोधैकलक्षणः ॥ इत्यमन्योन्यतादात्म्यप्रतिपत्तिर्यदा भवेत् ॥ अब्रह्मत्वं त्वमर्थस्य व्यावर्तेत तदैव हि ॥ तदर्थस्य च पारोक्ष्यं यद्येवं किं ततः शृणु ॥ पूर्णानंदैकरूपेण प्रत्यग्बोधोवतिष्ठत इत्यन्योन्यतादात्म्यप्रतिपत्तिः ॥ अहं ब्रह्मास्मीति ब्रह्मैवाहमस्मीत्येवं आकारवृत्या ज्ञानेन निवृत्ते ब्रह्मत्वपरोक्षत्वादीनां निवृत्तत्वात्प्रत्यगा

॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मनोखंडानंदस्वरूपावाप्तिर्भवतीति श्लोकतात्प
र्यार्थः॥ वृत्तिर्नाम विषयचैतन्याभिव्यंजकांतःकर
णाज्ञानयोः परिणामविशेषः॥ अभिव्यंजकत्वं ना
मापरोक्षव्यवहारजनकत्वमावरणनिवर्तकत्वं वा
॥ परिणामोपादानसमसत्ताकोन्यथाभावः॥ उपादा
नविषमसत्ताकोन्यथाभावो विवर्त इति भेदादनयोः
परिणामविवर्तयोर्वृत्तिभेदः॥ उपादानांतःकरणा
ज्ञानापेक्षया परिणामः॥ चैतन्यापेक्षया विवर्त इति
नास्तिक्षातविरोधः॥ तन्मनोनुकुरुतेत्यादिश्लोकस्यांतः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥
॥२०॥

करणस्यकार्यद्रव्यत्वेनसावयवंतथापरिणामि
त्वोपपत्तिः॥साचवृत्तिर्द्विविधा॥प्रमाप्रमाभेदात्
तत्रबोधेच्छावृत्तिर्वृत्तीधोबोधोवाप्रमा॥साचद्विवि
धा॥ईश्वराश्रयाजीवाश्रयाचेति॥तत्रेक्षणापरप
र्यायस्रष्टव्यविषयाकारमायावृत्तिप्रतिबिंबित
चिदीश्वराश्रया॥तदैक्षतबहुस्यांप्रजायेयेत्या
दिश्रुतेः॥अनधिगताबाधितविषयांतःकरण
वृत्तिप्रतिबिंबिताचिद्वृत्तीयाब्रह्मात्मैक्यंप्रमाया ॥२०॥
स्तथात्वात्॥तत्रमायांनाव्याप्तिः॥शुक्तिरजतादे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञातसत्ताकत्वेनाज्ञातसत्ताकत्वाभावान्नातिव्याप्तिः
॥ तत्करणं प्रमाणं ॥ सा जीवाश्रया प्रमा द्विविधा ॥
पारमार्थिकी व्यावहारिकी चेति ॥ तत्त्वमस्यादिवा
क्यजन्या प्रमा पारमार्थिकी ॥ सा चाग्रे निरूपिता नि
रूपयिष्यते च ॥ प्रपंचप्रमा व्यावहारिकी ॥ सा षड्वि
धा प्रत्यक्षानुमित्युपमितिशाब्द्यर्थापत्त्यभावभे
दात् ॥ तत्र विषयचैतन्याभिन्नप्रमाणचैतन्यं प्रत्य
क्षप्रमा ॥ तथाहि ॥ एकमेव चैतन्यं विषयभेदाच्चतुर्वि
धं प्रमातृचैतन्यं ॥ प्रमाणचैतन्यं विषयचैतन्यं फ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ २१ ॥

लं चैतन्यं चेति ॥ तत्रांतःकरणावछिन्नं प्रमातृचैतन्यं ॥ अंतःकरणवृत्यवछिन्नं प्रमाणचैतन्यं ॥ घटावछिन्नं चैतन्यं विषयचैतन्यं ॥ वृत्यभिव्यक्तं फलचैतन्यं ॥ तत्र वृत्तिविषययोर्युगपदेकदेशावछानेन तदुपहितचैतन्ययोरप्यभेदो भवति ॥ तथाहि तटाकोदकं छिद्रान्निर्गत्य कुल्याद्वारा केदारं प्रविश्य चतुष्कोणत्वाद्याकारेण परिणमते तथेंद्रियार्थसंनिकर्षानंतरमंतःकरणं चक्षुरादिद्वारा विषयदेशं गत्वा तेन संयुज्यते पश्चात्तदाकारेण परिणमते ॥ सोयं वृ

॥ २१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तिपरिणामस्तस्यां वृत्तौ विषयचैतन्यं प्रतिफलति
तदा वृत्तिविषययोर्युगपदेकदेशस्थत्वेन तदुपहित
चैतन्ययोर्भेदाप्रयोजकत्वात्प्रमाणचैतन्यं विषय
चैतन्याभिन्नं भवति सेयं प्रत्यक्षप्रमा॥ तत्र वृत्त्या आ
वरणं निवर्तते चैतन्येनाज्ञानं॥ प्रमेयाच्च सावरण
मज्ञानं निवर्तते॥ ततो विषयः स्फुरति साक्षिणा
अंतःकरणोपहितं चैतन्यं साक्षी॥ सेयं प्रत्यक्षप्र
माद्विविधा॥ बाह्यप्रमांतरप्रमा चेति॥ तत्र बाह्यप्र
मा शब्दस्पर्शरूपरसभेदात्पंचविधा तत्करणानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ २२ ॥

श्रोत्रादीनि तानींद्रियाणि पंच ॥ अंतरप्रमाद्विविधात्म
गोचरासुखादिगोचरा चेति ॥ आत्मगोचरापि द्वि
विधा ॥ विशिष्टात्मविषया शुद्धात्मविषया चेति ॥
अहंजीव इत्यादिविशिष्टात्मविषया ॥ अहंब्रह्मा
स्मीति शुद्धात्मविषया ॥ मयि सुखमिति सुखादिवि
षया ॥ अंतरप्रमाकरणं मन इंद्रियमिति वाचस्पति
मिश्राः ॥ आचार्यास्त्वेवं वर्णयंति ॥ इंद्रियेभ्यः परा
ह्यर्था अर्थेभ्यश्च परं मनः ॥ इंद्रियेभ्यः परं मन इत्या
दिश्रुतिस्मृतिभ्यां मनस इंद्रियेभ्यः पृथक्करणान्मनो

॥ २२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेंद्रियंवृत्तिंप्रत्युपादानत्वान्नकरणंमनःसुखादि
साक्षात्कारस्यप्रमाणाजन्यत्वेनाप्रमात्वमिष्टमेव
॥ अतएवांतःकरणतद्धर्माणांचशुक्तिरजतादिव
त्प्रातीतिकत्वं शुद्धात्मसाक्षात्कारस्यवेदांतवाक्य
जन्यत्वात्प्रमात्वं वाक्यस्याप्यपरोक्षज्ञानजनत्वंव
क्ष्यते ॥ अथलिंगज्ञानजन्यज्ञानमनुमितिः ॥ व्या
प्याश्रयोलिंगं ॥ साध्यसाधनयोर्नियतसामाना
धिकरण्यंव्याप्तिः ॥ प्रतिबंधकाभावेसतिसहचार
दर्शनेनसागृह्यते ॥ तस्यागृहीतायालिंगज्ञानेन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥
॥२३॥

व्याप्त्यनुभवजन्यसंस्कारोद्बोधे सत्यनुमितिर्जायते
इयं स्वार्थानुमितिरुक्त न्यायसाध्या ॥ न्यायोवयव
समुदायः ॥ प्रतिज्ञाहेतूदाहरणान्त्रयोवयवाः ॥
उदाहरणोपनयनिगमनरूपावा ॥ तथाहि जीवः
परस्मान्नभिद्यते सच्चिदानंदलक्षणत्वात्परमात्म
वदित्यत्र जीवः परस्मान्नभिद्यत इति प्रतिज्ञा सच्चि
दानंदलक्षणत्वं हेतु ॥ इदमेव लिंगमित्युच्यते
यः सच्चिदानंदलक्षणः परस्मान्नभिद्यते यथा पर
मात्मेत्युदाहरणं ॥ अहमस्मि भामिकदाप्यप्रियो

॥२३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नभवामीत्यनुभवाज्जीवस्यसच्चिदानंदलक्षणत्वं ॥ अतोहेतुत्वासिद्धिः ॥ सत्यंज्ञानमनंतब्रह्म ॥ आनंदो
ब्रह्मेतिव्यजानादित्यादिश्रुत्याब्रह्मणः सच्चिदानं
दलक्षणत्वं ॥ अतोनदृष्टांतासिद्धिः ॥ एवंगुरुमु
खाछ्रुतवेदांतस्यशोधितत्वंपदार्थस्यास्मिन्सच्चि
दानंदलक्षणात् ॥ अहंब्रह्मेतिब्रह्माभिन्नानुमिति
रुत्पद्यते ॥ नचोपनिषदस्यब्रह्मैक्यस्यानुमानग
म्यत्वानुपपत्तिः ॥ मंतव्यइतिमननविधानात् वे
दांतसहकारित्वेनानुमानप्रामाण्यस्वीकारात् ॥

47

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ २४ ॥

परार्थानुमितिस्तु न्यायोपदेशेनोत्पद्यते न्यायस्तूक्त एव ॥ एवं ब्रह्मव्यतिरिक्तस्य प्रपंचस्य मिथ्यात्वसाध्यानुमितिर्दृश्यत्वादिहेतुभिरुत्पद्यते मिथ्यात्वं नामानिर्वचनीयत्वं दृश्यत्वं नाम चैतन्यविषयत्वं ॥ अतो न ब्रह्मणि व्यभिचारः ॥ तच्चानुमानमन्वयिरूपमेकमेव केवलान्वयि ॥ अस्मन्मते ब्रह्मव्यतिरिक्तस्य सर्वस्यात्यंताभावप्रतियोगित्वेनैतद्प्रतियोगित्वरूपकेवलान्वयित्वस्याप्रसिद्धेः ॥ नापि व्यतिरेकिसाधनेन साध्यानुमितौ साध्याभावसाध

॥ २४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाभावव्याप्तिज्ञानस्यानुपयोगात् ॥ अन्वयव्याप्ति
मविद्वुषः तत्साध्यप्रमार्थापत्तिप्रमाणादिति वक्ष्य
ति ॥ अथ सादृश्यप्रमितिरुपमितिः ॥ यथा गोसदृ
शो गवय इति ॥ अथ वाक्यकरणिका प्रमा शाब्दी
॥ आकांक्षायोग्यतासंनिधिसत्पदसमुदायो वा
क्यं ॥ अन्वयानुपपत्तिराकांक्षा वाक्यार्थाबाधो यो
ग्यता ॥ अविलंबोच्चरणं संनिधिः ॥ अव्युत्पन्नस्य
संगतिग्रहाभावान्न वाक्यार्थप्रमा ॥ पदपदार्थयोः
स्मार्यस्मारकभावः संगतिः ॥ सा द्विधा शक्तिर्लक्षणा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ २५ ॥

चेति शक्तिर्नाममुख्या वृत्तिः पदपदार्थयोर्वाच्यवा
चकभावसंबंधइति यावत् ॥ सापियोगरूढिभेदेनद्वि
धा ॥ अवयवशक्तिर्योगो यथा पाचकादिपदानां ॥ रू
ढिः समुदायशक्तिर्यथा घटादिपदानां ॥ साच व्यव
हारादिनागृह्यते ॥ तथाहि उत्तमवृद्धस्य घटमान
येति वाक्यश्रवणानंतरं मध्यमवृद्धः प्रवर्तते ॥ सं
निहितो बालस्तत्र प्रवृत्तिं दृष्ट्वा ज्ञानमनुमिनो ॥ इयं प्र
वृत्तिर्ज्ञानसाध्या प्रवृत्तित्वात् ॥ मदीयप्रवृत्तिवदिति
ज्ञानमनुमातस्य वाक्यजन्यत्वमनुमिनोति ॥ इदं ज्ञा

॥ २५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमेतद्वाक्यजन्यमेतद्वाक्यान्वयव्यतिरेकानुविधा
यित्वाद्दृउजन्यघटादिवदित्यनंतरमावापोद्वापाभ्यां
घटपदस्यघटव्यक्तौशक्तिमवधारयति॥ साच श
क्तिः पदार्थइति नैय्यायिकाः॥ कार्यान्वितइतिमी
मांसकैकदेशिनः॥ अन्वितेशक्तिरितिवेदांतिनः
॥ एवंव्याकरणादिनापिशक्तिर्गृह्यते॥ उक्तंच॥ श
क्तिग्रहंव्याकरणोपमानकोशाप्तवाक्याद्व्यवहार
तश्च॥ वाक्यस्यशेषाद्विवृत्तेर्वदंतिसांनिध्यतः सि
द्धपदस्यवृद्धाइति॥ लक्षणाशक्यसंबंधः॥ साच

51

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥
॥२६॥

द्विविधा केवललक्षणा लक्षितलक्षणा चेति ॥ केवल
लक्षणा त्रिविधा ॥ जहल्लक्षणा जहल्लक्षणा जहदज
हल्लक्षणा चेति ॥ शक्यार्थपरित्यागेन तत्संबध्यर्था
तरे वृत्तिर्जहल्लक्षणा ॥ यथा गंगायां घोष इत्यत्र गंगा
पदस्य तीरे ॥ शक्यार्थापरित्यागेन तत्संबंध्यर्थांतरे वृ
त्तिरजहल्लक्षणा ॥ यथा मंचाः क्रोशंतीत्यत्र मंचपद
स्य मंचस्थे पुरुषे ॥ शक्यैकदेशपरित्यागेनैकदेशवृ
त्तिर्जहदजहल्लक्षणा ॥ इयमेव भागलक्षणेत्युच्यते
॥ यथा सोयं देवदत्त इत्यत्र सोयमिति पदयोः केवल

॥२६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देवदत्तपिंडे ॥ यथा वा त्तत्वमसीत्यत्र लक्ष्यतत्वं पदद्वयो
रखंडं चैतन्ये ॥ शक्यपरंपरासंबंधो लक्षितलक्षणा
॥ यथा द्विरेफशब्दस्य मधुकरे ॥ गौण्यपि लक्षितल
क्षणैव ॥ एवं व्युत्पन्नस्य गृहीतसंगति वाक्यार्थस्य
प्रमोत्पत्तौ आकांक्षा योग्यता सत्तिस्तात्पर्यज्ञानं चेच्चत्वा
रि कारणानि ॥ आकांक्षा योग्यते निरूपिते ॥ शक्ति
लक्षणान्यतरसंबंधेनाव्यवधानेन पदजन्यपदा
र्थोपस्थितिरासत्तिः ॥ तात्पर्यं द्विविधं वक्तृतात्पर्य
शब्दतात्पर्यं चेति ॥ पुरुषाभिप्रायो वक्तृतात्पर्यं त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ २७ ॥

ज्ञानं वाक्यार्थज्ञाने न कारणं ॥ तदभावेप्यव्युत्पन्नवा
क्यार्थज्ञानदर्शनात् ॥ तदितरप्रतीतिमात्रेछयानुच्चा
रितत्वेसति तदर्थप्रतीतिजननयोग्यत्वं शब्दतात्प
र्यं ॥ तच्चषड्विधलिंगैर्निश्चीयते वेदे ॥ लिंगानि तु ॥ उ
पक्रमोपसंहारावभ्यासोपूर्वता फलं ॥ अर्थवादोप
पत्तीच लिंगं तात्पर्यनिर्णयइति ॥ अस्यार्थः ॥ प्रकर
णप्रतिपाद्यस्याद्वितीयवस्तुन आद्यंतयोः प्रतिपा
दनमुपक्रमोपसंहारौ ॥ यथा छांदोग्ये षष्ठे ॥ सदेव
सोम्येदमग्र आसीत् ॥ एकमेवाद्वितीयं ॥ ऐतदात्म्य

॥ २७ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मिदंसर्वमित्युपक्रमोपसंहारावाद्यंतयोःप्रकरण
प्रतिपाद्यस्यपुनःपुनःप्रतिपादनमभ्यासः॥यथा
तत्रैवतत्त्वमसीतिनवकृत्वोभ्यासः॥प्र०स्यमानां
तराविषयपूर्वता॥यथातत्रैवाद्वितीयवस्तुनोमा
नांतराविषयता॥प्र०स्यतज्ज्ञानाद्वूयमाणंफलं
॥यथातत्रैवाचार्यवान्पुरुषोवेद तस्यतावदेवचि
रंयावन्नविमोक्ष्येथसंपत्स्यइत्यद्वितीयवस्तुज्ञान
तत्प्राप्तिफलं॥प्र०प्रशंसनमर्थवादः॥यथातत्रैव
येनाश्रुतंभवत्यमतंमतविज्ञातंविज्ञातमित्यादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥वे०॥ तीयवस्तुप्रशंसनं ॥ प्र० स्तूदयं तैः प्रतिपादनमु

॥२८॥ पपत्तिः ॥ यथातत्रैव यथा सोम्यैकेन मृत्पिंडेन सर्वं

मृन्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं

मृत्तिकेत्येव सत्यमित्यादिवाक्यप्रतिपादितमं

द्वादि दृष्टांतैरद्वितीये ब्रह्मणि तात्पर्यलिंगैर्वेदां

तानामद्वितीये ब्रह्मणि तात्पर्यनिश्चयः ॥ इदमे

व श्रवणमित्युच्यते ॥ श्रुतस्यार्थस्योपपत्तिभि

श्चिंतनं मननं ॥ तदुक्तं शब्दशक्तिविषयं निरू ॥२८॥

पणं युक्तितः श्रवणमुच्यते बुधैः ॥ वस्तुतत्त्ववि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षयंनिरूपणंयुक्तितोमननमित्युदीर्यते॥ चेतस
स्तच्चितिमात्रशेषताध्यानमित्यभिवदंतिवैदि
काः॥ अंतरंगमिदमित्थमीरितंतत्कुरुष्वपरमा
त्मबुध्ययइति॥ इदंश्रवणादित्रयंसाधसंपन्नस्य
सन्यासिनोज्ञानंप्रत्यंतरंगसाधनं॥ आत्मावारे
द्रष्टव्यः श्रोतव्योमंतव्योनिदिध्यासितव्यइत्या
दिश्रुतेः॥ साधनानितुनित्यानित्यवस्तुविवेक
इहामुत्रार्थफलभोगविरागः॥ शमादिसंपन्मुमु
क्षुत्वंचेत्येवरूपाणि॥ परीक्ष्यलोकान्कर्मचितान्ब्रा

57

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥ ल्पणो निर्वेदमायान्नास्त्यकृतः कृतेन तद्विज्ञानार्थं स

॥२९॥ गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं क

श्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्व

मिच्छन् ॥ शांतो दांत उपरतिस्तितिक्षुः समाहितो भू

त्वात्मन्येवात्मानं पश्येदित्यादिश्रुतिभ्यः ॥ यथोक्त

साधनसंपन्नस्य सन्न्याधिकारः ॥ विहितानां कर्मणां

विधिनात्यागः सन्न्यासः ॥ स च वैराग्यहेतुकः यदह

रेव विरजेत्तदहरेव प्रव्रजेदित्यादिश्रुतेः ॥ वैराग्यं ॥२३॥

परमेतस्य मोक्षस्य परमोवधिरिति स्मृतेश्च ॥ स च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वैराग्यतारतम्येन चतुर्विधः॥ कुटीचकबहूदकहंसपरमहंसभेदात्॥ वैराग्यं द्विविधमपरं परं चेति॥ तत्रापरं चतुर्विधं यतमानव्यतिरेकैकेंद्रियवशीकारभेदात्॥ अस्मिन्संसारे इदं सारमिदमसारमिति सारासारविवेकोयतमानवैराग्यं॥ चित्तगतदोषाणां मध्ये एतावंतः पक्वाः एतावंतोपक्वा इति विविच्यापक्वदोषनिरोधे यत्नो व्यतिरेकवैराग्यं॥ विषयेच्छासत्वेपि मनसींद्रियनिरोधावस्थानमेकेंद्रियत्ववैराग्यं॥ वशीकारवैराग्यमैहिकामुष्मिका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षयजिहासा ॥ तदुक्तं दृष्टानुश्राविकविषयवितृष्ण
स्य वशीकारसंज्ञा वैराग्यमिति ॥ तत्त्रिविधं मंदं तीव्रं
तीव्रतरं चेति ॥ पुत्रदारादिवियोगे धिक्संसार इति
बुध्या विषयजिहासा मंदवैराग्यं ॥ अस्मिन्जन्मनि
पुत्रदारादि मास्त्विति स्थिरबुध्या विषयजिहासा ती
व्रं ॥ पुनरावृत्तिसहितब्रह्मलोकादिपर्यंतं मास्त्विति
स्थिरबुध्या विषयजिहासा तीव्रतरं ॥ तत्र मंदवैरा
ग्ये संन्यासाधिकार एव नास्ति ॥ यदा मनसि वैराग्यं ॥ २० ॥
जायते सर्ववस्तुषु ॥ तदैव संन्यसेद्विद्वानन्यथा पति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तोभवेदितिस्मरणात् ॥ तीव्रवैराग्ये सति यात्राद्यशक्तो
कुटीचकाधिधिकारः ॥ तच्छक्तो बहूदकाधिकारः
॥ तीव्रतरवैराग्ये सति हंससंन्यासाधिकारः ॥ एते
षां त्रिविधसंन्यासिनामाचारश्च स्मृतो प्रसिधः ॥
तीव्रतरवैराग्ये मुमुक्षोः परमहंससंन्यासाधिका
रः ॥ स च परमहंससंन्यासो द्विविधः ॥ विविदिषासं
न्यासो विद्वत्संन्यासश्चेति ॥ साधनसंपन्नेन तत्वज्ञान
मुद्दिश्य क्रियमाणः संन्यासो विविदिषासंन्यासः ॥ ए
तमेव प्रव्राजिनो लोकमिच्छतः प्रव्रजंतीत्यादिश्रुति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥ स्तत्र माहंनं सन्वद्विधा। जन्मपारकककर्मत्यागात्मकः

॥ २१ ॥ प्रैषोच्चारणपूर्वकदंडधारणाद्याश्रमरूपश्चेति

॥ न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमा

नशुरित्यादिश्रुतिराद्ये मानं ॥ विरक्तस्य गृहस्थादेः

प्रबलानिमित्तवशेन संन्यासप्रतिबंधे आद्यसंन्या

सेधिकारः ॥ अत्र स्त्रीणामप्यधिकारः ॥ जनकादी

नां मैत्रेयीप्रभृतीनां तत्वविदां श्रुतिस्मृतीतिहास

पुराणेषूपलंभात् ॥ द्वितीये तु दंडमाच्छादनं कौपीनं ॥ २१ ॥

परिग्रहेच्छेषं विसृजेत् ॥ संसारमेव निःसारं दृष्ट्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सारदिदृक्षया प्रव्रजंत्यकृतोद्वाहाः परं वैराग्य
माश्रित्य इत्यादिवचनानि प्रमाणानि ॥ गृहस्थाश्र
मादौ कृतश्रवणादिभिरुत्पन्नब्रह्मसाक्षात्कारे
णागृहस्थादिना चित्तविश्रांतिलक्षणजीवन्मुक्ति
मुद्दिश्य क्रियमाणः संन्यासो विद्वत्संन्यासः ॥ तं चै
तमेव विदित्वा मुनिर्भवति ॥ अथ योगिनां परमहं
सानामित्यादि परमहंसोपनिषत् ॥ यदा तु विदितं
तत्त्वं परं ब्रह्म सनातनं ॥ तदैकदंडं संगृह्य सोपवी
तां शिखां त्यजेदित्यादि श्रुतिस्मृतिवचनानि प्रमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ तं० ॥ णानि ॥ तत्राद्यसंन्यासो जन्मांतरीयोपि ज्ञाने उपक
॥ ३२ ॥ रोति जनकादीनां तत्वज्ञानोपलंभाच्छ्रुत्यादिषु
यद्यातुरः स्यान्मनसा वाचा वा संन्यसेत् इत्या
तुरसंन्यासविधानाच्च ॥ आतुरेपि विरक्त एवा
धिकारान्न संन्यासांतरं ॥ अन्यथा प्रकरणभंगप्र
संगात् ॥ तदुक्तं ॥ जन्मांतरेष्वपि यदि साधनजातमा
सीत्संन्यासपूर्वकमिदं श्रवणादिकं च ॥ विद्यामवा
वाप्स्यति जनः सकलोपि यत्र तत्राश्रमादिषु व ॥ ३२ ॥
सन्न निवारयामस्त्विति ॥ तदेवं पूर्वोक्ताधिकारिणः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रवणादीनां तत्वज्ञानकारणत्वमन्वयव्यतिरेका
भ्यां निश्चीयते। अर्हार्थे श्रोतव्य इत्यादि तव्यप्रत्य
य इति वाचस्पतिमिश्राः।। आचार्यास्त्वेवं वर्णयंति
।। यथोक्ताधिकारिणो द्रष्टव्यः श्रोतव्य इत्यादिवा
क्यैर्दर्शनमुद्दिश्य मनननिदिध्यासनाभ्यां फलो
पकार्यंगाभ्यां श्रवणं नामांगि विधीयते।। तस्य च
दृष्टफलत्वान्नापूर्वविधिः।। अप्राप्तार्थविधाय
कोप्यपूर्वविधिः।। किंतु नियमविधिर्वा परिसं
ख्याविधिर्वा।। पक्षप्राप्तस्याप्राप्तांशपूरको वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ३३ ॥

धिर्नियमविधिः ॥ यथाव्रीहीन्नवहन्यादित्यवघात
विधिः ॥ उभयत्रा प्राप्तावितरव्यावृत्तिबोधको विधिः
परिसंख्याविधिः ॥ यथा इमामगृभ्णन्रशनामृ
तस्येत्यश्वाभिधानीमादत्त इति गर्दभरशनाव्या
वृत्तिः ॥ एवं सति प्रकृते जिज्ञासुर्वेदांतश्रवणमेव
कुर्यादिति परिसंख्याविधिर्वा ॥ तदुक्तं नियमः प
रिसंख्या वा विध्यर्थो हि भवेत् यतः ॥ अनात्मदर्शि
नेनैव परात्मानमुपास्महे इति ॥ तच्च श्रवणं सन्या
सिनां नित्यं ॥ नित्यकर्म परित्यज्य वेदांतश्रवणावि

॥ ३३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना ॥ वर्तमानस्तु संन्यासी पततेव न संशयः ॥ इत्यकर
णे प्रत्यवायश्रवणात् ॥ अस्तु तेराम्नते: कालं नये
देहांतं चिंतयेति स्म त्यायावज्जीवमग्निहोत्रं जुहु
यादिश्रुत्या जीवनं निमित्तीकृत्याग्निहोत्रविधा
नवज्जीवनं निमित्तीकृत्य श्रवणविधानात् ॥ तंप
दार्थविवेकाय संन्यासः ॥ सर्वकर्मणां ॥ श्रुत्या वि
धीयते यस्मात्तत्यागी पतितो भवेत् ॥ कारकस्यके
स्य करणे न तत्क्षणाद्विप्ररेव पतितो यथा भवेत्
व्यंजकस्य परिवर्जनात् सोऽसद्य एव पतितो यथाभे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संशय इति वार्तिकाचार्यसंक्षेपशारीरकाचार्याभ्यां
श्रवणादिरहितस्य संन्यासिनः पातित्याभिधाना
च्च गृहस्थादीनां श्रवणादिकामं ॥ दिने दिने तु वे
दांतश्रवणाद्भक्तिसंयुतात् गुरुशुश्रूषया ल
ब्धात्कृच्छ्राशीतिफलं लभेदिति फलश्रवणात्
अन्ये तु वेदांतश्रवणे साधनचतुष्टयसंपन्नस्यै
वाधिकाराद्गृहस्थादेः श्रवणाधिकार एव नास्ति
॥ इति श्रुत्या याज्ञवल्क्यजनकप्रभृतीनां तत्वज्ञान
प्रतिपादकोपाख्यानस्य ब्रह्मात्मनि तात्पर्यात्स्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्थे तात्पर्यमेव नास्तीत्याहुः प्रकृतमनुसरामः ॥
परं वैराग्यं गुणवैतृष्ण्यं ॥ गुणेभ्यो जिहासेति याव
त् ॥ तदुक्तं तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यमि
ति ॥ तच्चासंप्रज्ञातसमाधेरंतरंगसाधनं ॥ उक्तं च
॥ तीव्रवेगानामासन्नः समाधिलाभ इत्यलमति
प्रसंगेन ॥ एवं कर्मवाक्यानाप्युपक्रमादिभिस्ता
त्पर्यनिर्णयः ॥ प्रकरणादिना तु लौकिकवाक्या
नां तात्पर्यनिर्णयः ॥ एतादृशतात्पर्यानुपपत्तिः
पूर्वोक्तलक्षणाबीजं ॥ नत्वन्वयानुपपत्तिः तस्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥
॥३५॥

यष्टीः प्रवेशयेदित्यादाव् संभवेत् गंगायां घोष इ
त्यादौ तात्पर्यानुपपत्तेः संभवान्न केवल लक्षणा प
दमात्र वृत्तिः किंतु वाक्यवृत्तिरपि गंभीरायां नद्यां
घोष इत्यादौ पदसमुदायात्मक वाक्यस्य तीर लक्ष
णास्वीकारात्। अत एवार्थवादवाक्यानां प्राशस्त्ये
लक्षणा अन्यथा पदांतर वैयर्थ्यं स्यात्। अत एव
प्राशस्त्य पदार्थप्रत्यायकत्वेनार्थवादवाक्यानां प
दरूणानीयतया पदैकवाक्यत्वं स्वार्थे तात्पर्यवत्तां
समिधो यजति दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत

॥३५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्यादिवाक्यानामुपकार्योपकारकांक्षस्यैकवाक्यत्वं
यत्तद्वाक्यैकवाक्यत्वं। एवं चावांतरवाक्यार्थज्ञा
नमपिमहावाक्यार्थज्ञानेकारणं। तथान्वयव्य
तिकानुविधानात्। एवंयथोक्तसहकारिसंपन्नंवा
क्यंपरोक्षार्थभेदेनद्विविधाप्रमामुत्पादयति।
तत्रपरोक्षप्रतिपादकंवाक्यंपरोक्षप्रमोत्पादकं
यथास्वर्गकामोयजेत्। सदेवसोम्येदमग्रआसी
त्। दशमोस्तीतिवाक्यं। तत्रपरोक्षत्वंनामानावृ
तसंवित्तादात्म्याभावोयोग्यस्यविषयस्याधर्माध

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्मयोरयोग्यत्वान्नप्रत्यक्षत्वं ॥ अपरोक्षार्थप्रतिपाद
कं वाक्यमपरोक्षप्रमोत्पादकं ॥ यथा दशमस्त्वमसि
तत्वमसीत्यादिवाक्यं ॥ अपरोक्षत्वं नामानावृत
संवित्तादात्म्यं ॥ अनावृतसंवित्साक्षिचैतन्यं ॥ अं
तःकरणोपहितं चैतन्यं साक्षी ॥ तस्यावृत्तत्वे जग
दांध्यप्रसंगः ॥ तत्तादात्म्यं नाम तद्भिन्नत्वे सति तद
भिन्नसत्ताकत्वं ॥ यथा दशमस्त्वमसीत्यत्र दशम
स्त्वपदार्थाभिन्ना तया परोक्षत्वेन वाक्याद्दशमो
परोक्षप्रमैव जायते दशमोस्मीति ॥ न तु वाक्यात्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोक्षज्ञानं मनसा तत्साक्षात्कारः॥ मनसोऽनिंद्रियत्व
स्योक्तत्वात् वृत्तिप्रत्यक्षपादानत्वेन करणत्वायोगा
च्च॥ प्रमाणाजन्यापरोक्षज्ञानस्यैवापरोक्षप्रमात्वनिव
र्तकत्वाच्च॥ एवं तत्वमसीत्यत्रापि तत्पदलक्ष्यस्य ब्र
ह्मणस्त्वंपदलक्ष्यसाक्ष्यभिन्नत्वानां वृत्तसंवित्ता
दात्म्यान्नित्यापरोक्षत्वेन शोधिततत्वंपदार्थस्या
धिकारिणो मनननिदिध्यासनसंस्कृतांतःकर
णसत्वकृततत्वमस्यादिवाक्यादहं ब्रह्मास्मीत्य
परोक्षप्रमा जायते॥ एवं वसति सर्ववेदायसहमा

73

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ २७ ॥

मनंतितत्वौपनिषदंपुरुषंपृछ्छानावेदविन्मनुतेबृ
हंतमित्यादिश्रुतेयः सामंजस्येनोपपद्यंते मन
सैवानुद्रष्टव्यमित्यादिश्रुतिस्तुमनसोवाक्यस
कारित्वप्रतिपादनपुरा॥ अन्यथायन्मनसानमनु
तइत्यादिश्रुतिविरोधप्रसंगात्॥ एवंशाब्दप्रमा
निरूपिता॥ अनुपपद्यमानार्थदर्शनात्तदुपपाद
कीभूतार्थकल्पनमर्थापत्तिप्रमा॥ यथादिवाभु
जानस्यदेवदत्तस्यरात्रिभोजनंविनानुपपद्यमान ॥ २७ ॥
पीनत्वज्ञानात्तदुपपादकंरात्रिभोजनंकल्पितं॥ अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्वानुपपद्यमानपीनत्वज्ञानं करणं रात्रिभोजनक
ल्पनं फलं सा चार्थापत्तिर्द्विविधा दृष्टार्थापत्तिः
श्रुतार्थापत्तिश्च दृष्टार्थापत्तिर्यथा शुक्ताविदं
रजतमित्यनुभूयमानस्य रजतस्य नेदं रजतमि
ति बाध्यत्वं दृष्टं तस्य मिथ्यात्वमन्तरेण सत्यत्वेनु
पपन्नं सन्मिथ्यात्वं कल्पयति न चेदं रजतमिति
ज्ञानद्वयं पुरोवर्तिनि प्रवृत्त्यभावप्रसंगात् रज
तस्यासत्यत्वे तज्ज्ञानस्य प्रत्यक्षत्वाभावप्रसं
गात् सत्वे बाधाभावप्रसंगात् देशांतरसत्वे रज

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त० ॥ ३८ ॥

तेंद्रियसंनिकर्षाभावेन प्रत्यक्षत्वाभावप्रसंगात् रजतं
साक्षात्करोमीत्यनुभवस्य सर्वानुभवसिद्धत्वात् तस्मा
द्भ्रमकाले शुक्तिकाशकले रजतमुत्पद्यत इत्यंगीकर्त
व्यं रजतोत्पादकलौकिकसामग्र्यभावेपि पुरोवर्तीं
द्रियसंनिकर्षानंतरमिदमाद्याकारवृत्तौ सत्यामिद
मवच्छिन्नचैतन्यनिष्ठा शुक्तित्वप्रकारिका विद्या सा
दृश्यदर्शनमुद्बुद्धसंस्कारसहकृता रजताकारेण त
ज्ज्ञानाकारेण च परिणमते तस्य च मायाकार्यत्वा

॥ ३८ ॥

न्मिथ्यात्वं एवं दृष्टार्थापत्तिर्निरूपिता श्रुतार्थापत्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यथा ॥ तरति शोकमात्मविदिति शोकोपलक्षितममा
तृत्वादिसंबंधस्य ज्ञाननिवर्त्यत्वं श्रुतं तस्य मिथ्यात्व
मंतरेणासत्यत्वेनुपपन्नं सन्मिथ्यात्वं कल्पयति ॥ से
यं श्रुतार्थापत्तिः ॥ अंतःकरणावच्छिन्नं चैतन्यं प्र
माता कर्ता भोक्ता ॥ केवलस्यात्मनो संगत्वेन प्रमातृ
त्वाद्यनुपपत्तेः ॥ शुक्तिरजतवदात्माज्ञानादंतःकरणा
दिकं स्वरूपेणाप्रत्यगात्मन्यध्यस्तं ॥ अध्यासो नाम प
रत्र परावभासः ॥ स च द्विविधः ॥ ज्ञानाध्यासोर्थाध्यास
श्चेति ॥ तत्रातस्मिंस्तद्बुद्धिर्ज्ञानाध्यासः ॥ यथा शुक्तोर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ २९ ॥

जतबुद्धिः यथावात्मन्यनात्मबुद्धिः ॥ प्रमाणाजन्यज्ञा
नविषयः पूर्वदृष्टसजातीयोर्थोध्यासः सोपिद्विविधः
॥ प्रातीतिकोव्यावहारिकश्चेति ॥ तत्रागंतुकदोषज
न्यः प्रातीतिकः ॥ यथाशुक्तिरजतादि ॥ प्रातीतिकभि
नोव्यावहारिकः ॥ यथाकाशादिघटांतंजगत् ॥ तथा
च प्रमातृत्वादिबंधस्याध्यस्ततयामिथात्वमुपपद्यते
॥ एतदभिप्रायेणोक्तंभगवताभाष्यकारेणस्मृतिरू
पः परत्रपूर्वदृष्टावभासइति ॥ अस्यार्थः स्मृतिरू ॥ २९ ॥
पः संस्कारजन्यत्वेनस्मृतिसदृशः पूर्वदृष्टावभासः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पूर्वदृष्टसजातीयावभास इतिज्ञानाध्यासपक्षे ॥ अर्था
ध्यासपक्षेतु प्रमाणाजन्यज्ञानविषयः पूर्वदृष्टस
जातीय इति ॥ एवं श्रुतार्थापत्तिर्निरूपिता ॥ अभाव
प्रमा योग्यानुपलब्धिकरणिका ॥ यथा घटानुपल
ब्ध्या घटाभावप्रमा भूतले जायते तत्रानुपलब्धिरे
व करणं नेन्द्रियं ॥ तस्याधिकरणग्रहणोपक्षीणत्वा
त् ॥ अभावेन संनिकर्षाभावाच्च ॥ साधारणं कारणं
करणं नियतपूर्ववृत्ति कारणं ॥ तद्द्विविधमुपादान
कारणं निमित्तकारणं चेति ॥ कार्यान्वितकारणमु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ४० ॥

पादानं ॥ यथा घटादेर्मृदादि कार्यानुकूलव्यापारवं
निमित्तं यथा घटादेः कुलालादि ॥ ब्रह्म तु मायोपहि
तं सत्स्वपंचस्योपाधि प्राधान्येनोपादानं स्वप्राधान्ये
न चा निमित्तं भवति ॥ तदेतत् ब्रह्मसूत्रे "प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्"
इति सूत्राच्च ॥ तच्च कारणं द्विविधं साधारणमसाधा
रणं चेति ॥ कार्यमात्रोत्पादकं साधारणं ॥ यथा दृष्टा
दि कार्यविशेषोत्पादकमसाधारणं कारणं ॥ यथा
चाक्षुषादि प्रमाया चक्षुरादि ॥ तथा च घटाद्यभाव

॥ ४० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दृशायां घटाद्यनुपलब्धिरसाधारणं कारणं तदेव
करणं ॥ यद्यत्र घटः स्यादिति तार्किते न प्रतियोगि
सत्वेन तर्ह्युपलभ्येतेति प्रसंजितोपलब्धिरूपः प्र
तियोगी यस्याः सा योग्यानुपलब्धिस्तया भावो गृ
ह्यते ननु अर्थोल्लिखित धी विषयो भावः सोस्तता भा
व एव भेदे प्रमाणाभावात् ॥ तथाहि सदेव सोम्येदम
ग्र आसीत् असत्वाच्चापरस्येति श्रुतिस्मृतिस्तत्रा
भ्यां प्रागुत्पत्तेः कार्यस्य कारणात्मना सत्वप्रतिपा
दनेन प्रागभावस्य दुर्निरूपत्वात् ॥ भागात्मज्ञानात्का

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥
॥८१॥

र्यस्यानिरन्वयनाशानंगीकारेणध्वंसस्यापिदुर्निरूप
त्वात्॥अनादिनित्यत्रैकालिकात्यंताभावान्योन्याभा
वसत्वेद्वैतश्रुतिविरोधापत्तेः॥अतोत्यंताभावएवकु
एवसत्वाद्विविधः पारमार्थिकोव्यावहारिकश्चेतिने
हनास्तिकिंचनेत्यादिश्रुतिपादितप्रपंचात्यंताभा
वः पारमार्थिकः सचाधिष्ठानस्वरूपः॥अधिष्ठा
नातिरिक्तइतिकेचित्॥घटाद्यत्यंताभावोव्यावहा
रिकः॥अयमेवाभेदप्रतियोगिकोभूतलंघटोने
त्यादिप्रतीतिविषयोभेदइत्युच्यते॥घटोनास्तीत्या

॥८१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिप्रतीतिविषयोत्यंताभावइत्युच्यते वादिभिः॥
सर्वेप्यनित्यएवसर्वस्यब्रह्मज्ञाननिवर्त्यत्वात्॥
अन्येतुलौकिकतंत्रांतरबुद्धिमनुसरंतोभावभे
दस्वीचक्रुः॥ तथाहिप्रागभावप्रध्वंसाभावोत्यंता
भावोन्योन्याभावभेदाच्चतुर्विधोभावः॥ उत्पत्तेः
प्राक्कारणेकार्याभावःप्रागभावः॥ यथामृदादौ
घटाद्यभावः॥ उत्पन्नस्यकार्यस्यकारणेभावोध्वं
साभावः॥ यथामुद्गरादिप्रहरणानंतरंकपाला
दौघटाद्यभावः॥ प्रतियोग्यसमानाधिकरणाभा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ४२ ॥

भावोऽत्यंताभावः यथा भूतलादौ घटभेदः ॥ सर्वे
ष्यभावा अनित्याश्चेति ॥ एवमभावप्रमाणं निरूपि
तं ॥ एवं षड्विधप्रमयासावरणमज्ञानं निवर्तते
॥ तत्र परोक्षप्रमयासत्वापादकमोब्याज्ञाननि
वृत्तिः ॥ अपरोक्षप्रमयासत्वाभानापादकाज्ञान
निवृत्तिः ॥ प्रमाभिन्नं ज्ञानमप्रमा सा चद्विविधा ॥
स्मृतिरनुभवश्च ॥ संस्कारमात्रजन्यं ज्ञानं स्मृतिः
॥ सापि द्विविधा ॥ यथार्थायथार्थभेदात् ॥ यथार्था
स्मृतिरपि द्विविधा ॥ अनात्मस्मृतिरात्मस्मृतिश्चेति

॥ ४२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्रव्यावहारिकप्रपंचो मिथ्या दृश्यत्वाच्छुक्तिरूप्य
वदित्यनुमानसिद्धमिथ्यात्वानुसंधानं यथार्थाना
त्मस्मरणं॥ तत्वमस्यादिवाक्यार्थानुसंधानं यथा
र्थस्मरणं॥ अयथार्थस्मृतिरपि द्विविधा पूर्ववत्
प्रपंचस्य सत्यत्वानुसंधानमयथार्थनात्मस्मरणं
मिथ्या वस्तुत्वात्तस्य अहंकारादिष्वात्मानुसंधानं
॥ आत्मनि कर्तृत्वाद्यनुसंधानं वायथार्थात्मस्मरणं
॥ स्वप्नस्त्वनुभव एव॥ न स्मृतिरिति वक्ष्यते॥ स्मृति
भिन्नं ज्ञानमनुभूतिः॥ सा द्विविधा॥ यथार्थायथार्था

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ४३ ॥

चेति ॥ यथार्थानुभूतिः प्रमा सा निरूपिता ॥ बाधितवि
षयानुभूतिरयथार्था ॥ सापि द्विविधा ॥ संशयो निश्च
यश्चेति ॥ एकस्मिं धर्मिणि भासमानविरुद्धनानाको
टिकं ज्ञानं संशयः ॥ एकस्मिं धर्मिणि स्वाकारविरुद्ध
वैशिष्ट्यावगाहिज्ञानाविरुद्धज्ञानं संशय इति केचि
त् प्रमाणसंशयः प्रमेयसंशयश्चेति ॥ तत्र प्रमाण
गतासंभावना प्रमाणसंशयः ॥ यथानभ्यासदशा
यां मम मोत्पन्नं जलज्ञानं प्रमाणं न वेति संशयः ॥ स च
प्रामाण्यनिश्चयान्निवर्तते ॥ प्रामाण्यनिश्चय

॥ ४३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तः स्वत एव ॥ प्रामाण्यं नाम तद्वति तत्प्रकारकत्वं ॥ त
स्य स्वतस्त्वं नाम यावत्स्वाश्रयग्राहकग्राह्यत्वं ॥
स्वाश्रयो वृत्तिज्ञानं तद्ग्राहकं साक्षिचैतन्यं तेन तन्नि
ष्ठं प्रामाण्यं गृह्यत इति स्वतः प्रामाण्यं अप्रामा
ण्यं तु परतो गृह्यते ॥ तच्च तदभाववति तत्प्रकारकत्वं
॥ तदभाववत्त्वस्य वृत्तिज्ञानानुपनीतत्वेन साक्षिणा
ग्रहीतुमशक्यतया परत एवाप्रामाण्यं गृह्यते ॥ प्रा
माण्यस्वतस्त्वपक्षे संशयो दोषवशादुपपद्यते ॥
इत्ययं प्रमासंशयः ॥ वेदान्ता अद्वितीये ब्रह्मणि प्रमा

॥ त० ॥
॥ ४४ ॥

णं नेवेति संशयः करणगता संभावना सा च श्रवणेन
निवर्त्तते ॥ तच्च निरूपितं ॥ तदपि श्रवणं शारीरके प्र
थमाध्याय पठनेन निष्पद्यते ॥ प्रमेयगता संभाव
ना द्विविधा अनात्मगतात्मगता चेति चेति ॥ स्थाणु
र्वा पुरुषो वेत्यनात्मसंशयः ॥ आत्मसंशयो नेक
विधः ॥ तथाहि ब्रह्माद्वितीयं सद्वितीयं वा ॥ अद्विती
यत्वेप्यानंदगुणकं वानंदस्वरूपं वेत्यादि परमात्म
गतः संशयः ॥ आत्मा देहाद्व्यतिरिक्तो वा न वा देहा
द्व्यतिरिक्तत्वेपि कर्त्ता वाकर्त्ता वा ॥ अकर्तृत्वेपि चिद्रू

॥ ४४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पोवाच्चिद्रूपोवा॥ च्चिद्रूपत्वेप्यानंदात्मकोवानवेत्या
दिजीवगतः संशयः॥ जीवस्यसच्चिदानंदरूपत्वेपि
परमात्मनासहैक्यंसंभवतिनवा॥ ऐक्येपितत्ज्ञा
नं मोक्षसाधनंवानवामोक्षसाधनत्वेपितज्ज्ञानं
कर्मसमुच्चितंमोक्षसाधनंवाकेवलंज्ञानंवेत्यैक्य
गतः संशयः॥ अयंसर्वोपिसंशयोमननेतर्कात्म
कनेननिवर्तते॥ तर्कोनामानिष्टप्रसंगः व्याप्या
रोपेणव्यापकापादानमितियावत्॥ व्याप्त्याश्रयो
वाव्याप्यंव्याप्तिनिरूपकंव्यापकं॥ तेथाच्चयदिप्रपं

89

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ४५ ॥

न्नः सत्यः स्यात्तर्ह्यद्वितीयश्रुतिविरोधः स्यात्॥यदि
परमात्मा जीवभिन्नः स्यात्तर्हि घटादिवदनात्मत्वे नानि
त्य एव स्यात्॥यद्यात्मानंदो स्यात्तर्हि कोपि न व्याप्रियेते
त्यादिव्याप्यारोपेव्यापकप्रसंजनरूप तर्कोश्रुत्यु
क्तादृष्टव्याः॥एतच्च मननं शारीरके द्वितीयाध्याय
पठणेन निष्पद्यते॥संशयविरोधित्वान्निश्चयः
सत्वाद्द्विविधः॥तर्को विपर्ययश्चेति॥तर्कस्तूक्त एव॥वि
पर्ययो मिथ्याज्ञानम तस्मिंस्तद्बुद्धिरिति यावत्॥स
चाद्द्विविधः॥निरुपाधिकः सोपाधिकश्चेति॥तत्रा

॥ ४५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धोद्विविधः॥ बाह्योभ्यंतरश्चेति॥ श्रुत्याद्याविदं ज
तमित्यादि बाह्यः अहमज्ञो ब्रह्म न जानामीत्याभ्यं
तरः॥ सोपाधिको द्विविधः॥ बाह्योभ्यंतरश्चेति लो
हितस्य स्फटिक इत्यादि बाह्यः आकाशादि प्रपंच
भ्रमोपि बाह्यः सोपाधिकः॥ कार्याविद्याकार्यत्वा
त्तत्वज्ञानिनोनिवृत्तेप्यज्ञाने प्रारब्धक्षयपर्यंतं प्र
पंचोपलब्धिस्तथ्यदर्शनात्॥ कर्तृत्वादिभ्रमोभ्यंत
रः स्वप्नोप्याभ्यंतरः सोपाधिभ्रम एवं नतु स्मृतिः
तथाहि जाग्रद्भोगप्रदकर्मोपरमे सति स्वप्नभोग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ४६ ॥

प्रदकुमेन्द्रिके सकलविषयेंद्रियादिवासनावासितं
निद्रादोषोपप्लुतमंतःकरणं रथादिविषयवाह्याका
रेण ग्राहकेंद्रियाद्याकारेण रथादिविषयाकारवृत्त्या
कारेण च परिणमते ॥ अंतःकरणोपहितः साक्षी
स्वयमन्यानवभास्यस्तत्सर्वमवभासयति ॥ अत
एव स्वप्ने साक्षिणः स्वप्रकाशत्वं सुज्ञेयं ॥ जाग्रदव
स्थायां सूर्यादितेजोभिः संकीर्णत्वात् ॥ साक्षिणः
स्वप्रकाशत्वं दुर्विज्ञेयं ॥ स्वप्ने तु सूर्यादीनां जाग्रत्स
दार्थानामुपरमत्वात्स्वप्रकाशत्वं विवेक्तुं शक्यते ॥

॥ ४६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथा च श्रुतिः स यत्र प्रस्वपित्यस्य लोकस्य सर्वाव
तो मात्रामुपादाय स्वयं विहत्य स्वयं निर्माय स्वेन भा
स्वेन ज्योतिषा स्वपित्यत्रायं पुरुषः॥ स्वयंज्योतिर्भ
वति न तत्र रथान् रथयोगान् पंथानो भवंति॥ अथ
रथान्रथयोगान्पथः सृजत इत्यादि॥ स्वयंज्योतिः
॥ स्वप्रकाशश्चैतन्याविषय इति यावत्॥ एवं स्वप्नो
नुभवरूप एव न स्मृतिः॥ अन्यथा रथं पश्यामीत्यनु
भवविरोधप्रसंगः स्यात्॥ स्वप्नपदार्थानामंतःकर
णमायाकाराश्चैतन्याध्यस्तत्वेनेदानींतनत्वासा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥
॥४७॥

त्काराभावेन बाधाभावेपि सोपाधिकतयोपाधिनि
वृत्त्या तन्निवृत्तिरिति न जाग्रदवस्थायामनुवृत्तिः
।कर्मनिद्रोपप्लुतमंतःकरणमुपाधिः॥ केचित्तु
स्वप्नाध्यासं निरुपाधिकं वदंति॥ तन्नविरोधिजा
ग्रत्संलयेन तन्निवृत्तिः॥ पुनश्च विपर्ययः प्रकारां
तरेणाद्विविधः॥ अंतःकरणवृत्तिरूपोविद्यावृत्ति
रूपश्चेति॥ स्वप्नादिरंतःकरणवृत्तिरूपः रजता
दिभ्रमोविद्यावृत्तिरूपः॥ संशयस्त्वविद्यावृत्तिरे
व॥ तत्रैवसतिनिरुपाधिकविपर्ययोनिदिध्यास

॥४७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नेन निवर्तते॥ सोपाधिकस्तूपाधिनिवृत्त्या॥ निदि
ध्यासनं निरूपितमेव॥ तदपि शारीरके तृतीया
ध्यायपठनेन निष्पद्यते॥ एवं च श्रवणमनन
निदिध्यासनैरसंभावनाविपरीतभावनानिवृ
त्तौ वसत्यस्मिन्प्रतिबंधे तत्त्वमस्यादिवाक्याद्दहं
ब्रह्मास्मीत्यपरोक्षप्रज्ञा समुज्जायते॥ तदुक्तं ऐहिक
मप्यप्रस्तुतप्रतिबंधे तद्दर्शनादिति॥ प्रतिबंधस्त्रि
विधो भूतभावी वर्तमानभेदात्॥ भूतप्रतिबंधः पू
र्वानुभूतविषयस्यावशेन पुनः पुनः स्मरणं॥ त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ४८ ॥

उपाधिकब्रह्मानुसंधानेन तन्निवृत्तिः ॥ यथाभिक्षोः
पूर्वानुभूत महिष्यादिस्मरणेन तल्लग्नानानुत्पत्तौ गु
रूपदिष्टतदुपाधिकब्रह्मानुसंधानेन तन्निवृत्तिरिति
वदंति ॥ भाविप्रतिबंधो द्विविधः ॥ प्रारब्धशेषो ब्र
ह्मलोकेच्छा चेति ॥ तत्र प्रारब्धं कर्म द्विविधं फलाभि
संधिकृतं केवलं चेति ॥ तत्र फलाभिसंधिकृतं फलं
दत्वैव नश्यति तस्मिन्सति ज्ञानं नोत्पद्यते ॥ तच्च प्रब
लत्वात् ॥ तथा च श्रुतिः स यथाकामो भवति तत्क्र
तुर्भवति यत्क्रतुर्भवति तत्कर्म कुरुते ॥ यत्कर्म कुरुते

॥ ४८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदभिसंपद्यत इति तादृशप्रारब्धविशेषोभावीप्रति
बंधः केवलप्रारब्धं तत्वज्ञाने हेतुः पापनिवृत्तिद्वारा
॥ तथा च श्रुतिस्मृती ॥ धर्मेण पापमपनुदति ॥ ज्ञान
मुत्पद्यते पुंसां क्षयात्पापस्य कर्मणः इति ॥ कषायेक
र्मभिः पक्वे ततो ज्ञानं प्रवर्तत इति च ॥ एवं च भाविप्रति
बंधस्य प्रारब्धशेषस्य भोगेन निवृत्तौ सत्यपि श्रव
णादौ न ज्ञानोदयः ॥ यथाहुः ॥ एकेन जन्मना क्षीणो
भारतस्य त्रिजन्मभिरिति ॥ ब्रह्मलोकेच्छायाः ब्रह्म
साक्षात्कारोत्पत्तिप्रतिबंधकत्वं विद्यारण्यस्वामिनो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ४८ ॥

वदंतिस्म ॥ ब्रह्मलोकाभिवांछायांसम्यक्कृतात्तयानि
रोध्यतां ॥ विचारयेद्य आत्मानंनतुसाक्षात्करोत्ययमि
ति ॥ सपुनर्वेदांतश्रवणमहिम्नाब्रह्मलोकंगत्वानि
र्गुणंब्रह्मसाक्षात्करोति ॥ तथाचश्रुतिः ॥ वेदांतवि
ज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्ध
सत्वाः तंब्रह्मलोकेतुपरांतकालेपरामृतात्परिमु
च्यंतिसर्वइतिसपुनस्तत्रैवमुच्यते ॥ वर्तमानप्रति
बंधंतान्निरूपणार्थंविद्यारण्यस्वामिनोवर्णयांच
क्रुः ॥ प्रतिबंधोवर्तमानोविषयासक्तिलक्षणः ॥

॥ ४८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मशा मूंघ्रंकृतर्कश्चविपर्यय दुराग्रहः ॥ शमाद्यैः श्र
वणाद्यैर्वा तत्र तत्रोचिते ः क्षयं नीते स्मिन्प्रतिबंधे तु
स्वस्य ब्रह्मत्वमश्नुत इति ॥ ततश्श्रवणादिना सकल
प्रतिबंधनिवृत्या वाक्याब्रह्मसाक्षात्कारोपपत्तौ श
मदमोपरतितितिक्षाश्रद्धासमाधानान्यंतरंगसाधना
नि ॥ अंतरिंद्रियनिग्रहः शमः ॥ बाह्येंद्रियनिग्रहो द
मः ॥ उपरतिः सन्यासः तितिक्षा द्वंद्वसहिष्णुत्वा ॥ श्र
द्धा गुरुवेदांतविश्वासः ॥ समाधानं श्रवणादिषु चि
त्तैकाग्र्यं शांतो दांत उपरतिस्तितिक्षुः ॥ समाहितो भू

99

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ५० ॥

त्वात्मन्येवात्मानं पश्येदित्यादिश्रुतेः ॥ सूत्रकारोप्याह
॥ शमदमाद्युपेतः स्यात्तथापि तद्विधेयस्तदंगतयातेषाम
वश्यानुष्ठेयत्वादिति ॥ यज्ञादयो बहिरंगसाधनानि ॥ तमेतं वेदानुवचनेन ब्राह्मणा विविदिषंति यज्ञेन दानेन तपसानाशकेनेति श्रुतेः ॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववदित्यप्युक्तं ॥ तदेवं मननादिसंस्कृतचित्तदर्पणसहकृतविचारितमहावाक्यात्सोनाहं ब्रह्मास्मीत्यप्रतिबद्धब्रह्मसाक्षात्कारेणात्तानेनानिवृत्तसंचितकर्मणां नष्टत्वादागामिकर्मणामश्लेषात्प्रारब्ध

॥ ५० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पादितविषयमनुभवन्मुमुक्षुरखंडैकरमसच्चिदा
नंदब्रह्मात्मभावेनतिष्ठते॥ एतादृशं फलं चतुर्थाध्या
यपठनेनभवतीतिसांप्रदायिकानां रीतिः॥ अन्येतु
गुरुमुखात्संपूर्णशास्त्रपठणं श्रवणं॥ तस्यपठित
स्ययुक्तिभिरनुसंधानं मननं॥ तस्यैवपुनः पुनरावृ
त्तिर्निदिध्यासनं अनंतरं ब्रह्मसाक्षात्कार इत्याहुः
॥ वस्तुतस्तु शुद्धसत्वानां मुख्याधिकारिणां व्युत्पन्ना
नां च श्लोकेन वा कार्येन वा ब्रह्मसाक्षात्कारो भवत्येव
॥ शब्दस्याचिंत्यशक्तित्वात्॥ शास्त्रस्यशारीरकादे

K K S U LIBRARY RAMTEK 441 106 M-1838 Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ५१ ॥

रमुख्याधिकारिविषयोपपत्तेः॥ तदुक्तं महाभारते
आत्मानं विंदते यस्तु सर्वभूतगुहाशयं॥ श्लोकेन यदि
वार्धेन क्षीणं तस्य प्रयोजनमिति एवमेव सांप्रदायि
कैरप्युक्तं॥ वाक्यश्रवणमात्रे पापिशाचकवदाप्नुया
दिति॥ एतावानत्र विशेषः॥ अव्युत्पन्नानां परतंत्रप्र
ज्ञत्वादसंभावनादिसंभवाद्ध्याननिष्ठापेक्षिता तदुक्तं
भगवता अन्ये त्वेवमजानंतः श्रुत्वान्येभ्य उपासते ते
पि चातितरंत्येव मृत्युं श्रुतिपरायणा इति॥ विद्यारण्यै
रप्युक्तं॥ अत्यंतबुद्धिमांद्याद्वा सामग्र्या वाप्यसंभवा

॥ ५१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त् योविचारं नलभते अस्मोपासीतसोनिशमिति ॥ मर
णोअस्मिँलोकेवातत्वंज्ञात्वाविमुच्यत इति च ॥ पतंजलि
नाप्युक्तं ॥ ततः प्रत्यक्चेतनाधिगमोंतरायाभावश्चे
ति ॥ प्रमाणकुशलानां ॥ संशयादिग्रस्तानां पंडितानां
मपि ध्याननिष्ठापेक्षिता ॥ तदुक्तं ॥ अभिसंराधने प्र
त्यक्षानुमानाभ्यामिति ॥ अन्यत्राप्युक्तं ॥ बहुव्याकु
लचित्तानां विचारात्तत्वधीर्नचेत् ॥ योगो मुख्यस्तत
स्तेषां धीदर्पस्तेन नश्यतीति ॥ संशयादिरहितानां ध्या
ननिष्ठा चेत्स्यादिष्टं सुखं ॥ तदुक्तं भगवता ॥ अनन्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ५२ ॥

श्चिंतयंतो मां ये जनाः पर्युपासते ॥ तेषां नित्याभियुक्ता
नां योगक्षेमं वहाम्यहं ॥ मच्चित्ता मद्गतप्राणा बोध
यंतः परस्परं ॥ कथयंतश्च मां नित्यं तुष्यंति च रमंति
चेति ॥ ननु ज्ञानिनो ध्यानविधिः ॥ देहाभिमानश्च भ्र
न्यतया कर्तृत्वाभावेन तस्य विधिकिंकरत्वायोगात् ॥
तदुक्तं अनुज्ञापरिहारो देहसंबंधाज्ज्योतिरादिवदि
ति ॥ भाष्यकारैरप्युक्तं ॥ अहं ब्रह्मास्मीत्येतदवसाना
एव सर्वे विषयाः सर्वाणि च शास्त्राणि विधिप्रतिषेध ॥ ५२ ॥
मोक्षपराणीति ॥ देहेंद्रियादिष्वहं ममाभिमानहीन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यप्रमातृत्वानुपपत्तौ प्रमाणाप्रवृत्त्यनुपपत्तेरिति वेगौणमिथ्यात्मनोसत्वेपुत्रदेहादिबाधनात्॥ स ब्रह्मात्माहमस्मीति बोधेकार्यंकथंभवेदित्युक्ते॥ ज्ञा निनोध्यानाभावेव्यवव्वहारप्राचुर्यादुःखमात्रं नमोक्षप्रतिबंधः तदुक्तं॥ तन्निष्ठस्यमोक्षोपदेशा दिति॥ तस्मिन्ब्रह्मात्मनिनिष्ठानन्यव्यापारतयाप रिसमाप्तिः पर्यवसानंयस्यसतथातस्यज्ञानैकश रण्यस्येतियावत्॥ तथाचभगवानप्याहस्म॥ यएवं वेत्तिपुरुषंप्रकृतिंचगुणैः सह॥ सर्वथावर्तमानोपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ५३ ॥

नसम्भूयोपिजायते ॥ यस्यनाहंकृतोभावोबुद्धिर्यस्य
नलिप्यते ॥ हत्वापिसइमांल्लोकान्नहंतिननिबध्य
ते ॥ शेषोपि ॥ हयमेधसहस्राण्यथकुरुतेब्रह्मघा
तलक्षाणानि ॥ परमार्थविन्नपुण्यैर्नचपापैःस्पृश्य
तेविमलइतिविद्यारण्यैरप्युक्तंपूर्णेबोधेतदन्यौद्वौ
प्रतिबुद्धौयदातदा ॥ मोक्षोविनिश्चितःकिंतुदृष्टदुः
खंननश्यतीति ॥ बोधस्यपूर्णत्वावधिर्विष्णुपुराणे
पराशरेणादर्शितः ॥ अहंहरिःसर्वमिदंजनार्दनो ॥ ५३ ॥
नान्यत्ततःकारणकार्यजातं ॥ ईदृङ्मनोयस्यनत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यभूयोभवोऽज्ञवाद्वंद्वगताभवंतीति॥ ब्रह्मगीतायां
ब्रह्माणंप्रतिशिवेनापि॥ अहंहिसर्वंनचकिंचिद
न्यंनिरूपणायांभवतीति॥ इयंहिवेदस्यपराहिनिष्ठा
ममानुभूतिश्चनसंशयश्चेति॥ उपदेशमहस्त्रिका
यामपिदेहात्मज्ञानवज्ज्ञानंदेहात्मज्ञानबाधकं॥ आ
त्मन्येवभवेद्यस्यसनेच्छन्नपिमुच्यतेइति॥ अयमस्मी
तिपुरुषः इत्यनुपायमितिश्रुतेः तात्पर्यंप्रतिपादन
व्याजेनविचारणपरैरपिदर्शितः तत्त्वदीपे असंदिग्धा
विपर्यस्तबोधोदेहात्मनीक्षिते॥ तद्वदात्मनिनिर्णीतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ५४ ॥

मयमित्यच्यतेउ नरिति ॥ सर्वथापिश्रवणादिनाब्र
ह्मसाक्षात्कारः ततोब्रह्मभावलक्षणामुक्तिर्भवती
तिसिद्धं ॥ तमेवंविदित्वातिमृत्युमेति ॥ तरतिशोक
मात्मवित् ॥ ब्रह्मवेदब्रह्मैवभवति ॥ एवमेवैषसंप्र
सादोस्माच्छरीरात्समुत्थाय परंज्योतिरूपंसंपद्य
स्वेनरूपेणाभिनिष्पद्यतेसउत्तमः पुरुषः आ
त्मानंचेद्विजानीयादयमस्मीतिपूरुषः ॥ किमिच्छ
न्कस्यकामायशरीरमनुसंज्वरेत् ॥ यत्क्षणीनदैक ॥ ५४ ॥
बोधस्तद्ब्रह्माहमस्मीतिकृतकृत्योभवति ॥ एत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बुध्वासुखिमान्स्यात्कृतकृत्यश्चभारतेत्यादिश्रुति
स्मृतिभ्यः। शेषोप्याकुदृसाग्राच्युतपादोयद्वद्
निछन्नपिक्षितोपतति। तद्वदुपाकुरुषज्ञोनिछ
न्नपिक्षिकोपवर्त्तीभवतीतिसाचमुक्तिर्द्विविधा
।विदेहमुक्तिर्जीवन्मुक्तिश्चेति। तत्रतत्वज्ञानि
नोभोगेनप्रारब्धकर्मक्षयेवर्तमानशरीरपातो
विदेहमुक्तिः। तदुक्तंभोगेनत्वितरेक्षपयित्वासं
पद्यतइतिअन्येतु। भाविशरीरानारंभोविदेहमु
क्तिः। साचज्ञानोत्पत्तिसमकाला। ज्ञानेनाज्ञानेनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ तं० ॥
॥ ५५ ॥

वृत्ते संचितकर्मणां नाशात् ॥ आगामिकर्मणा म
श्लेषाद्योगेन प्रारब्धस्य याच्छरीरांतरं कस्यासंभवा
न्नाविशरीरारंभकस्य ज्ञानसमकालत्वं युज्यते ॥ त
दुक्तं ॥ तीर्थे श्वपचगृहे वा नष्टस्मृतिरपि त्यजं देहं ॥
ज्ञानसमकालमुक्तः कैवल्यं याति हतशोक इत्येवं
वर्णयांचक्रुः ॥ श्रवणादिभिरुत्पन्ने साक्षात्कारस्य
विद्वत्संन्यासिनः ॥ कर्तृत्वाद्यखिलबंधप्रतिभासनि
वृत्तिजत्वेन मुक्तिः ॥ भोगापादककर्मप्राबल्येपि यो
गाभ्यासेन तदभिभवसंभवात् ॥ प्रारब्धापेक्षयायो

॥ ५५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गाभ्यासस्य प्रबलत्वात् ॥ अन्यथा पुरुषस्य प्रयत्नं वै
यर्थ्येन किंचित्स्यात् शास्त्रमारभ्य मोक्षशास्त्रपर्यंतस्या
नारंभप्रसंगात् ॥ अतएव पुरुषप्रयत्नस्य साफल्यमा
ह वसिष्ठः ॥ आबाल्यादलमभ्यस्तैः शास्त्रसत्संगमा
दिभिः ॥ गुणैः पुरुषयत्नेन सोर्थः संप्राप्यते हितः इति
॥ विमुक्तिश्च विमुच्यत इति श्रुतेः ॥ यो जागर्ति सुषुप्तिस्थो यस्य जाग्रन्न वि(?)
बोधः स जीवन्मुक्त उच्यत इति वासिष्ठे ॥ प्रजहाति
यदा कामान्सर्वान्पार्थ मनोगतान् ॥ आत्मन्येवात्मना तुष्ट
स्थितप्रज्ञस्तदोच्यते ॥ अद्वेष्टा सर्वभूतानां मैत्रः करु

111

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ५६ ॥

ण एव च ॥ निर्ममो निरहंकारः समदुःखसुखः क्षमी ॥ संतुष्टः सततं योगी यतात्मा दृढनिश्चयः ॥ मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः इति ॥ अत्र जीवन्मुक्त एव भक्त इत्युच्यते ॥ प्रकाशं च प्रवृत्तिं चेत्यारभ्य गुणातीतः स उच्यत इत्यंतेन जीवन्मुक्तो दर्शितः ॥ निराशिषमनारंभं निर्नमस्कारमस्तुतिं अक्षीणं क्षीणकर्माणं तं देवा ब्राह्मणं विदुरिति ॥ महाभारते यथा स्वप्नप्रपंचोयं मयि मायाविजृंभितः ॥ एवं जाग्रत्प्रपंचोयं मयि मायाविजृंभितः

॥ ५६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतियोद्वेदांतैः सोतिवर्णाश्रमी भवेदिति पुराणे
सेयं जीवन्मुक्तिस्तत्वज्ञानवासनाक्षयमनोनाशा
भ्यासात्सिध्यति। उत्पन्नस्य तत्वज्ञानस्याभ्यासो ना
म पुनः पुनः केनाप्युपायेन तत्वानुसंधानं। तदुक्तं
तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं। एतदेक
परत्वंच ब्रह्माभ्यासं विदुर्बुधा इति। यद्यपि तत्वज्ञा
नात्प्रागपि वासनाक्षयमनोनाशाभ्यासोपेक्षित
स्तथापि विविदिषोः सन्यासिनः स उपसर्जनभूतः
श्रवणाद्यभ्यास एव प्रधानः। विद्वत्सन्यासिनः स्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्वज्ञानाभ्यासउपसर्जनभूतेः वासनाक्षयमनो
नाशाभ्यासः प्रधान इत्यविरोधः ॥ कृतोपासनस्य
मुख्याधिकारिणस्तदपेक्षाभावेप्यकृतोपास्तेर
स्मदादेस्तदभावेचित्तविश्रांत्यभावात् ॥ उत्पन्न
मपितत्वज्ञानंविषयाबाधात्प्रमारूपमज्ञाननिव
र्तकमप्यसंभावनादिसंभावात्नसुखकरमिति
वासनाक्षयमनोनाशाभ्यासोपेक्षितः ॥ वासना
सामान्यलक्षणंतद्विभागंतत्प्रयोजनंतल्लक्षंच
वसिष्ठआह ॥ दृढभावनयात्यक्तंपूर्वापरविचारणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यदा स्यान्नं परार्थस्य वासना सा प्रकीर्त्तिता ॥ वासना द्वि
विधा प्रोक्ता शुद्धा च मलिना तथा ॥ मलिना जन्महे
तुः स्यात् शुद्धा जन्मविनाशिनी ॥ अज्ञानसुघनाकारा
घनाहंकारशालिनी ॥ पुनर्जन्मकरी प्रोक्ता मलिना वा
सना बुधैः ॥ पुनर्जन्मांकुरं त्यक्त्वा स्थिता संभ्रष्टबीज
वत् देहार्थं ध्रियते ज्ञानज्ञेया शुद्धेति चोच्यत इति म
त्र मलिनवासना जन्महेतवो नेकप्रकारा दर्शिताः ॥
॥ लोकवासनया जंतोर्देहवासनयापि च ॥ शास्त्रवा
सनया ज्ञानं यथावन्नैव जायत इति ॥ दंभो दर्पोभिमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त० ९८

नश्च क्रोधः पारुष्यमेव च ॥ अज्ञानं चाभिजातस्य
पार्थ संपदमासुरीमिति च ॥ योषित्पुत्रादिविषयाभि
लाषाश्च मलिनवासनाः दृष्ट्याः ॥ विवेकदोषदर्शि
नसत्संगसान्निधित्यागप्रतिकूलवासनोत्पादनेनो
क्तानां मलिनवासनानामंतःकरणगतानामनु
त्पादो वासनाक्षयाभ्यासः ॥ तथैव वशिष्ठादिभिर्द
र्शितं ॥ दृष्टासंभवबोधेन रागद्वेषादितानवे ॥ रति
र्नवोदिता यातु बोधाभ्यासं विदुः परं इति ॥ असंग
व्यवहारित्वात् भवभावनभर्जनात् ॥ शरीरनाशाद

९८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्त्सिताक्षासनानप्रवर्त्ततइतिच॥ दुःखंजन्मजरादुः
खंदुःखोमृत्युःपुनःपुनः॥ संसारमंडलंदुःखंप
च्यंतेयत्रजंतवइतीतिहासे॥ निःसंगतामुक्तिपदं
यतीनांसंगाद्शेषाःप्रभवंतिदोषाः॥ आरूढयो
गोपिनिपात्यतेधःसंगेनयोगीकिमुताल्पसिद्धि
रितिविष्णुपुराणे॥ तथामहाभागवतेपि संगंत्य
जेत्मिथुनव्रतीनांमुमुक्षुःसर्वात्मनानविसृजेद्ब
हिरिंद्रियाणि॥ एकश्चरेद्रहसिचित्तमनंतईशेयुं
जीततद्व्रतिषुसाधुषुचेत्प्रसंगइति॥ स्त्रीणांतत्सं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ५६ ॥

गिनां संगं त्यक्त्वा हरत आत्मवान् ॥ क्षेमे विविक्त आसी
नश्चिंतयेन्मामतंद्रित इति च ॥ महत्सेवां द्वारमाहुर्वि
मुक्तेस्तमोद्वारं योषितां संगिसंगं ॥ महांतस्ते समचि
त्ताः प्रशांता विमन्यवः सुहृदः साधवो य इति च
॥ तत्संगे पातित्यमाह ॥ योषिद्धिरण्याभरणांबरा
दिद्रव्येषु मायारचितेषु मूढः ॥ प्रलोभितात्मा ह्यु
पभोगबुध्या पतंगवन्नश्यति नष्टदृष्टिरिति ॥ प्रति
कूलवासना मे आदिवासनास्ताश्च दर्शिताः ॥ मैत्री ॥ ५८ ॥
करुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षयाणां भावनातश्चित्तप्रसादनमिति ॥ अस्यार्थः

सुखिषु प्राणिषु एते मदीया इति मैत्री ॥ दुःखिषु प्रा

णिषु यथा मम दुःखं माभूदेवमन्येषामपि दुःखं

माभूदिति करुणा ॥ पुण्यकारिषु मुदितां पापिषूपे

क्षां ॥ भावनातो भावनां कुर्वतः ॥ रागद्वेषासूयामद

मात्सर्यादिनिवृत्या चित्तप्रसादो भवतीति ॥ तथा दै

वीसंपदेभ्यासेनासुरीसंपन्नस्यति ॥ दैवीसंपद्भग

वता दर्शिता ॥ अभयं सत्वसंशुद्धिरित्यारभ्य दैवीम

भिजातस्येत्यन्तेन ॥ अमानित्वमित्यादिनोत्वमानि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ९० ॥

त्वादिधर्माभ्यासेन तद्विरीतमानादयो नश्यति ॥ त
थामेत्यादिवासनां तु कल्पपूर्वकामभ्यस्यानंतरम
जिकत्वादिधर्मानभ्यस्येत् ॥ अजिकत्वादयो दर्शिताः
॥ अजिकः षंडकः पंगुरंधो बधिर एव च ॥ मुग्धश्च
मुच्यते भिक्षुः षड्भिरेतैर्न संशयः ॥ इदमिष्टमिदं नेति
योऽश्नन्नपि न सज्जते ॥ हितं सत्यं मितं वक्ति तमजिकं
प्रचक्ष्यते ॥ अद्यजातां यथा नारीं तथा षोडशवार्षि
कीं ॥ शतवर्षां च यो दृष्ट्वा निर्विकारः स षंडकः ॥ भिक्षा ॥ ९० ॥
र्थमटणं यस्य विण्मूत्रकरणाय च ॥ योजनान्न परं या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वथा पंगुरेव सः ॥ तिष्ठतो व्रजतो वापि यथा चक्षुर्न
दूरगं ॥ चतुर्युगं भुवं मुक्त्वा परिव्राट् सोंध उच्यते ॥ हि
ताहितं मनोरामं वचः शोकापहं च यत् ॥ श्रुत्वा च
यो न शृणोति बधिरः संप्रकीर्तितः ॥ सांनिध्ये विष
याणां च समर्थो विकलेंद्रियः ॥ सुप्तवद्वर्तते नित्यं स
भिक्षुर्मुग्ध उच्यत इति ॥ तदनंतरं चिन्मात्रवासना
मभ्यसेत् ॥ नामरूपात्मकस्य जगतश्चैतन्ये कल्पि
तत्वेन स्वतः सत्ताशून्यतया चैतन्यसत्तास्फुरण
पूर्वकमेव स्फुरणं भवति ॥ तत्र नामरूपे मिथ्यात्वनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥ ॥६१॥

द्विधर्माभ्यासेनोपेक्ष्यचिन्मात्रेहमितिभावयेत्॥ सेयं
चिन्मात्रवासनाद्विःप्रकारा॥ कर्तृकर्मकरणानुसं
धानपूर्विकाकेवलाचेति॥ तत्रसर्वजगच्चिन्मात्रं
महंमनसाभावयामीतिक्रियमाणाप्रथमा॥ सासं
प्रज्ञातसमाधिकोटावंतर्भवति॥ कर्तृकर्मकरणा
नुसंधानरहिताचिन्मात्रोहमितिभावनाकेवला॥ सर्व
स्यचिन्मात्रत्वंश्रुत्केणबहुलिंप्रत्यक्षपरिदृष्टं॥ चिद्दिहास्ती
तिचिन्मात्रंसर्वंचिन्मयमेवतत्॥ चित्वंचिदहमेवेति
लोकाश्चिदितिसंग्रहः॥ द्वितीयसंप्रज्ञातकोटावंतर्भ

॥६१॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वति ॥ तस्यां चिन्मात्रवासनायां दृढतयाभ्यस्तायां
पूर्वोक्ता मलिनवासनाः सर्वाः क्षीयंते ॥ अथ वासना
क्षयाभ्यासः ॥ जतुस्वर्णादिवत्सावयवं कामादि
वृत्तिरूपेण परिणममानमंतःकरणं मननात्मक
त्वान्मनः ॥ तच्च सत्वरजस्तमोगुणात्मकं ॥ तदाश्रय
त्वेन सत्वरजस्तमोविकाराणां सुखदुःखमोहादी
नामुपलंभात् ॥ रजस्तमोवृत्तिभिरुपचीयमानं पीन
मात्मदर्शनायोग्यं भवतीत्यतस्तदर्थं वृत्तिनिरोधेन
सूक्ष्मतापादनं मनसो नाश इत्युच्यते ॥ तस्मात्साधा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ६२ ॥

नानि ॥ दर्शितानि अध्यात्मविद्याधिगमः साधुसंगम
एव च ॥ वासनासंपरित्यागः प्राणस्पंदनिरोधनं ॥ ए
तास्ताः युक्तयः पुष्टाः संति चित्तजये किलेति ॥ प्राण
निरोधोपायो दर्शितः ॥ प्राणायामदृढाभ्यासाद्युक्त्या
च गुरुदत्तया ॥ असनाशनयोगेन प्राणस्पंदो निरुध्य
त इति ॥ प्राणायामप्रकारो दर्शितः ॥ ७ ॥ इडया पिब षो
डशभिः पवनं चतुरुत्तरषष्टिकमौदरिकं त्यज पिं
गलया शनकैः शनकैर्दशभिर्दशभिर्द्विधिकैरिति ॥ ६२ ॥
॥ इडया वामनाशिकया पिब पूर्वं पश्चात्त्यजरेचय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पिंगलया दक्षिणनाशिकयेत्यक्षरार्थः ॥ प्राणाया
मस्य मनोनाशोपायत्वं श्रुतावप्युक्तं ॥ प्राणान्प्रपी
ड्येह सुयुक्तचेष्टः ॥ क्षीणे प्राणे नासिकयोच्छ्वसीत
दुष्टाश्वयुक्तमिव वाहमेनं विद्वान्मनो धारयेताप्र
मत्त इति ॥ आसनयोगं तत्साधनं तत्फलं पतंजलि
रसूत्रयत् स्थिरसुखमासनं प्रयत्नशैथिल्यानंत
समापत्तिभ्यां ॥ ततो द्वंद्वानभिघात इति प्रयत्नशै
थिल्यं लौकिकवैदिककर्मत्यागः ॥ फणासहस्रेण
धरणीं धत्वा योनंतो ववर्तते स एवाहमस्मीत्यनुसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त० ॥ ६३ ॥

धानं ॥ अनंतसमापत्तिरनया आसनं प्रति बंधकं उरितं क्षीयते ॥ आसनाभ्यासस्य फलं द्वंद्वनिवृत्तिः अशनयोगोपि दर्शितः ॥ द्वौ भागौ पूरयेदन्नैर्जलेनैकं प्रपूरयेत् ॥ मारुतस्य प्रचारार्थं चतुर्थमवशेषयेदिति ॥ एवं प्राणायामादिना प्राणस्पंदे निरुद्धे खिलाश्चित्तवृत्तयो निरुध्यंते ॥ प्राणस्पंदाधीनत्वाच्चित्तवृत्तेः स्फटिकस्य ॥ ततश्च स्वभावत आत्मानात्माकारमंतःकरणमनात्माकारवृत्तिनिरोधादात्मैकाकारं भवति ॥ यथा ॥ ६२ ॥ रुः ॥ आत्मनाकारं स्वभावतो वस्थितं सदाचितं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आत्मैकाकारतयातिरस्कृतानालद्दष्टिविधीय
तेइति अयमेवयोगः यथाहुः योगश्चित्तवृत्ति
निरोधइति तत्साधनंचाहुः अभ्यासवैराग्याभ्यां
तान्निरोधइति भगवानपि असंशयंमहाबाहो
मनोदुर्निग्रहंचलं अभ्यासेनतुकौंतेयवैराग्येण
गृह्यतेइति वैराग्यंनिरूपितं योगोद्विविधोसंप्र
ज्ञातोसंप्रज्ञातश्चेति तत्रकर्त्राद्यनुसंधानंविना
लक्ष्यैकगोचरःप्रत्ययप्रवाहःसंप्रज्ञातसमाधिः
यथाहुः विलाप्यविकृतिंकृत्स्नासंभवव्यत्यय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ६४ ॥

क्रमात् ॥ परिशिष्टं चिन्मात्रं सदानंदं विचिंतयेत् ॥ ब्रह्मा
कारमनोवृत्तिप्रवाहोहंकृतिं विना ॥ संप्रज्ञातसमाधि
स्याद्ध्यानाभ्यासप्रकर्षज इति ॥ अस्य संप्रज्ञातसमा
धेरंगिनो यमादीन्यष्टांगानि ॥ तत्र यमनियमासन
प्राणायामप्रत्याहार बहिरंगानि ॥ अहिंसासत्यम
स्तेयब्रह्मचर्यापरिग्रहा यमाः ॥ अष्टांगमैथुनव
र्जनं ब्रह्मचर्यं ॥ यथाहुः स्मरणं कीर्तनं केलिः प्रेक्ष
णं गुह्याभाषणं ॥ संकल्पोध्यवसायश्च क्रियानिर्वृत्ति
रेव च ॥ एतन्मैथुनमष्टांगं प्रवदंति मनीषिण इति ॥

॥ ६४ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विपरीतं ब्रह्मचर्यमनुष्ठेयं मुमुक्षुभिः ॥ सत्संगसं-
निधित्यागो दोषदर्शनतो भवेदिति ॥ अत एव स्त्रीसं-
भाषादिनिषेधोपि मुमुक्षूणां ॥ न संभाषेत् स्त्रियं कां-
चित्पूर्वं दृष्टां च न स्मरेत् ॥ कथां च वर्जयेत्तासां न प-
श्येल्लिखितामपीत्यादिस्मृतेः ॥ शौचसंतोषतपः-
॥ स्वाध्यायेश्वरप्रणिधानानि नियमाः ॥ आसनं
निरूपितं ॥ तच्च पद्मस्वस्तिकाद्यनेकप्रकारं ॥ रेचकपू-
रककुंभकाः प्राणायामाः ॥ इंद्रियाणां विषयेभ्यो
निवर्तनं प्रत्याहारः ॥ एतेषु बहिरंगेषु जितेष्वंतरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ६५ ॥

गेषुयत्नं कार्यं॥ धारणाध्यानसमाधयः संप्रज्ञात
समाधेरंतरंगसाधनानि॥ धारणा नाम मूलाधार
मणिपूरकस्वाधिष्ठानानाहतविशुध्याज्ञासहस्रा
रदेशानामन्यतरस्मिन्प्रत्यगात्मनि वा चित्तस्य स्था
पनं तदेकस्मरणमिति यावत्॥ ध्यानं नाम तत्रप्र
त्ययैकता॥ लक्ष्यैकगोचरप्रत्ययप्रवांतरितस्त
दनंतरितश्चेति॥ आद्योध्यानं द्वितीयः समाधिः
॥ सोपि द्विविधः॥ कर्त्राद्यनुसंधानपूर्वकस्तद्रहित
श्चेति॥ अद्योंगसमाधिर्द्वितीयो संप्रज्ञातसमाध्यु

॥ ६५ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्येलयविक्षेपकषायरसास्वादाश्चत्वारोपिघ्नाः
संति ॥ लयोनिद्रा पुनः पुनर्विषयानुसंधानं विक्षे
पः चित्तस्यरागादिनास्तब्धीभावः कषायः ॥ समा
ध्यारंभसमयेसविकल्पानंदास्वादोरसास्वादः
॥ यथाह लयेसंबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः
॥ सकषायं विजानीयात्समप्राप्तं न चालयेत् ॥ ना
स्वादयेद्रसं तत्र निःसंगः प्रज्ञया भवेदिति ॥ अस्या
र्थः प्राणायामादिना लयाभिमुखं चित्तमुत्थाप्य
दोषदर्शनब्रह्मानुसंधानादिना विक्षिप्तं चित्तं शम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ६६ ॥

शमयेत्कल्पप्राप्तं चित्तं न चालयेत् ॥ समाध्यारंभस
मये सविकल्पानंदं नास्वादयेत् किंतूदासीनप्रलमत्तया
युक्तो भवेदिति ॥ एवं निर्विघ्नेन संप्रज्ञातसमाध्यभ्या
सेनाध्यात्मप्रसारमापन्ने मनसि ऋतंभरप्रज्ञोदेति
॥ अतीतानागतविप्रकृष्टव्यवहितसूक्ष्मविषयं
योगीप्रत्यक्षम् ऋतंभरप्रज्ञा तामपि निरुध्य समा
धिमभ्यस्यतो गुणावैतृष्ण्यं परं वैराग्यमुदेति ॥
तच्च निरूपितं ॥ ततोभ्यासः कर्तव्यः उत्साहप्रय
त्नलोभ्यास इति तस्यापि निरोधे सर्वधीनिरोधोभ

॥ ६६ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वति ॥ अयमेवासंप्रज्ञातसमाधिः ॥ नकेवलं परं वैरा
ग्यादेव समाधिलाभः ॥ किंत्वीश्वरप्रणिधानादपित
थाचोक्तं ॥ ईश्वरप्रणिधानाद्वा क्लेशकर्मविपाकाश
येरपरामृष्टः पुरुषविशेष ईश्वरः ॥ तस्य वाचकः
प्रणवः ॥ तज्जपस्तदर्थभावनमपीतीश्वरप्रणि
धानाद्वा समाधिलाभः ॥ क्लेशादिभिरसंबद्धः सर्व
ज्ञः सर्वशक्तिरीश्वरः ॥ ईश्वराभिधायकः शब्दः प्र
णवः प्रणवजपः ॥ मांडूक्योपनिषत्स्पष्टीकरणं
तद्वार्तिकोक्तप्रकारेण प्रणवार्थानुसंधानं चेश्वर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰
६७

प्रणिधानां अथवा तद्योहं सोसौ योसौ सोहमित्यत्र
शब्देन परमात्मोच्यते अहंशब्देन प्रत्यगात्मोच्यु
ते अनयोः शब्दयोः समानाधिकरण्यात्प्रत्यगात्मै
क्यमुच्यते ततश्च सोहमित्यस्य परमात्माहमित्य
र्थो यथा तथा प्रणवस्यापि तथाहि सोहमित्यत्र
सकारहकारलोपे कृते परिशिष्टयोरतज्जतस्वर
योरोमित्यनयोः संधिकृतोच्चारणे ओमिति शब्दो
निष्पन्नः तदुक्तं सकारं च हकारं च लोपयित्वा प्र
योजयेत् संधिं च पूर्वरूपाख्यं ततोसौ प्रणवो भवे

६७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विति ॥ ततश्चोमित्यस्य शब्दस्य परमात्माहमित्यर्थः
॥ सर्वथापि प्रणवजपप्रणवार्थानुसंधानरूपेश्वरप्र
णिधानेन परमेश्वरानुग्रहात्समाधिलाभो भवत्येव
॥ एवं समाध्यभ्यासेनांतःकरणस्यातिसूक्ष्मतापाद
नं मनोनाशइत्युच्यते ॥ अनेन सूक्ष्मेण मनसा त्वंप
दलक्ष्ये साक्षात्कृते महावाक्येन स्वस्य ब्रह्मत्वसाक्षा
त्कारो भवति न केवलं समाधिनैव ब्रह्मसाक्षात्कारः
किंतु विवेकेनापि भवति ॥ अंतःकरणतद्वृत्ती नामव
भासको यश्चिदात्मा साक्षि तस्मिन्साक्षात्कारे कृते वा

135

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ९६ ॥

क्याद्भुतसाक्षात्कारः संभवत्येव तदाह ॥ देवोऽक्रमोऽचि
न्तनाशस्य योगो ज्ञानं च राघव ॥ योगस्तद्वृत्तिरोधो हि
ज्ञानं सम्यगवेक्षणं ॥ असाध्यः कस्यचिद्योगः क
स्यचिज्ज्ञाननिश्चयः ॥ प्रकारौ द्वौ ततो देवो जगाद पर
मेश्वर इति ॥ ज्ञानविवेकस्तृतीयाध्याये ॥ इंद्रियाणि
पराण्याहुरित्यारभ्य कामरूपं दुरासदमित्यंते न वि
वेकुं षष्ठाध्याये योगश्च यत्सांख्यैः प्राप्यते स्थानं त
द्योगैरपि गम्यत इति च ॥ देवः सर्वज्ञः परमेश्वरो भ
गवान् ॥ द्वौ प्रकारौ जगाद इति श्लोकार्थः ॥ तदेवं तत्व

॥ ९८ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्ञानवासनाक्षयमनोनाशाभ्यासाज्जीवन्मुक्तेः पंचप्र
योजनानिसंति॥ज्ञानरक्षातपोविसंवादाभावोदुःखं
निवृत्तिःसुखाविर्भावश्चेति॥तत्रोत्पन्नब्रह्मसाक्षात्का
रस्यपुनःपुनःसंशयविपर्ययानुद्भावोज्ञानरक्षा॥त
थाहिज्ञानिनांशुकरीयवनिदारीनामिवाकृतोपास्तेर्वि
निनोस्मदादेश्चित्तविश्रान्त्यभावात्पुनःपुनःकदाचि
त्संशयविपर्ययौसंभवतः॥अज्ञाननिवृत्तावपिमोक्षप्र
तिबंधकौतदाहभगवान्॥अज्ञश्चाश्रद्दधानश्चसंश
यात्माविनश्यति॥ततश्चजीवन्मुक्त्यभ्यासेनसंभावित

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ६० ॥

संशयविपर्ययनिवृत्तिर्ज्ञानरक्षामामप्रथमं प्रयोजनं ॥
चित्तैकाग्र्यं तपः मनसश्चेंद्रियाणां च ह्यैकाग्र्यं परमं
तपः सज्यायः सर्वधर्मेभ्यः स धर्मः पर उच्यत इति स्म
रणात् ज्ञानिनो जीवन्मुक्तस्याखिलवृत्तीनामनुदया
न्निरंकुशं चित्तैकाग्र्यं संपद्यते तदेव तपः तच्च लोक
संग्रहाय भवति तदुक्तं लोकसंग्रहमेवापि संपश्यन्क
र्तुमर्हसीति संग्राह्यो लोकस्त्रिविधः शिष्यो भक्त
स्तटस्थश्चेति तत्र सन्मार्गवर्ती शिष्यः गुरूपदिष्ट
मार्गेण श्रवणादिना ब्रह्मसाक्षात्कुर्वन्मुच्यते आचा

॥ ६० ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यवान्पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्ये
अथ संपत्स्य इति श्रुतेः ॥ भक्तोपि ज्ञानिनः पूजान्नदाना
दिनाभीष्टं प्राप्नोति ॥ तथा च श्रुतिः ॥ यं यं लोकं मनसा सं
विभाति विशुद्धसत्वः कामयते यांश्च कामान् ॥ तं तं लोकं
जयते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेद्भूतिकाम इति
॥ स्मृतिरपि ॥ यद्गेहे को ब्रह्मविद्भुंक्ते जगत्तत्तर्पयतेखिलं ॥
तस्माद्ब्रह्मविदे देयं यद्यदस्ति वस्तु किंचनेत्यादि ॥ तदरूपो
द्विविधः ॥ सन्मार्गवर्त्यसन्मार्गवर्ती चेति ॥ तत्र स
न्मार्गवर्तिमुक्तस्य सदाचारप्रवृत्तिं दृष्ट्वा स्वयमपि तत्रै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥ प्रवर्तते तदाह भगवान् यद्यदाचरति श्रेष्ठस्तत्तदेवेत
॥ ७१ ॥ रोजनाः ॥ सयत्प्रमाणं कुरुते लोकस्तदनुवर्तते इति
असन्मार्गवर्तिकुजीवन्मुक्तस्य दृष्टिपातेन सर्वपापैः
प्रमुच्य तरति तथा च स्मृतिः ॥ यस्यानुभवपर्यंताबु
द्धिस्तत्ते प्रवर्तते तद्दृष्टिगोचराः सर्वे मुच्यंते सर्वकि
ल्बिषैरिति द्विषिणापि ज्ञानि दुष्कृतं संभावितं गृ
ह्णाति तथा च श्रुतिः ॥ तस्य पुत्रा दायमुपयंति सुहृदः
साधुकृत्यां द्विषंतः पापकृत्यामिति एवं जीवन्मुक्त
तपोलोकसंग्रहाय भवतीति तपोनाम द्वितीयं प्रयोज

॥ ७१ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नं जीवन्मुक्तस्य व्युत्थानदशायां कर्मठायं सदृक्ष तनिं
दादिश्रवणेपि पारुषवाङ्क्रूरनिष्ठुरादिदर्शनादावपि
चित्तवृत्त्यनुदयात् ॥ विसंवादो न भवति ॥ यथाहुः ज्ञा
त्वा वयं तत्वनिष्ठानमुदासामहे वयं ॥ अनुशोचाम ए
वान्यान्न भ्रांतौ विवदामहे इति विसंवादाभावो नाम तृ
तीयं प्रयोजनं ॥ दुःखनिवृत्तिर्द्विविधा ऐहिकामुष्मिका
चेति ॥ ज्ञानेन भ्रांतिर्निवृत्त तया योगाभ्यासेनाखिलवृ
त्तिनिरोधेन चित्तस्यात्मैकाकारतया ऐहिकाखिलदुःख
वृत्तिः ॥ प्रारब्धभोगे सत्यपि ॥ तथा च श्रुतिरात्मानं चेद्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ७२ ॥

जानीयादित्यानात् ऐहिकदुःखनिवृत्तिर्मुक्तस्य दर्शय
ति ॥ ज्ञानेनाज्ञाननिवृत्त्या संचितागामिकर्मणामश्ले
षविनाशाभ्यामामुष्मिकदुःखानामपि निवृत्तिः ॥ तथा च
श्रुतिः ॥ एतं ह वाव न स्पैति पति किमहं साधु नाक
रवं किमहं पापकरवमित्यादिदुःखनिवृत्तिर्नाम चतु
र्थप्रयोजनं ॥ मुक्तस्य ज्ञानयोगाभ्यामज्ञानतत्कृतावर
णविक्षेपनिवृत्त्या बाधकाभावात्परिपूर्णब्रह्मानंदानु
भवः सुखाविर्भावः ॥ इममेवार्थं श्रुतिर्दर्शयति ॥ समा
धिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत्सुखं

॥ ७२ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवेत् ॥ न शक्यते वर्णयितुं गिरा तदा स्वयं तदंतःकरणेन
गृह्यत इति ॥ स्फुरत्वाविर्भावो नाम पंचमं प्रयोजनं ॥ एवं स्व
रूपप्रमाणसाधनफलनिरूपणेन द्विविधा मुक्तिर्निरूपि
ता ॥ तस्माद्ब्रह्मविज्जीवन्मुक्तो भोगेन प्रारब्धकर्मक्षये
वर्तमानशरीरपाते खंडैकरसमुब्रह्मानंदात्मनावति
ष्ठते ॥ न तस्य प्राणा उत्क्रामंत्यत्रैव समवलीयंते ब्रह्मैव
सन्ब्रह्माप्येति ब्रह्म वेद ब्रह्मैव भवति ॥ विभेदजनके ज्ञा
ने नाशमात्यंतिकं गते ॥ आत्मनो ब्रह्मणो भेदमसंतं कः
करिष्यति तज्ञावमापंनस्ततो सो परमात्मानः भवत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥
॥ ७३ ॥

भेदाभेदश्च तस्याज्ञानकृतो भवेदित्यादिश्रुतिशतेभ्यः
भगवान्सूत्रकारोप्याह ॥ अस्मिन्नस्य च तद्योगं शास्ती
ति तस्मादहं ब्रह्मास्मि तत्वमस्यामि वाक्यजन्यज्ञानाद्ब्र
ह्मभावलक्षणो मोक्षो भवतीति सिद्धं ॥ न स पुनरावृत्ति
र्नो न्नर्तते ह्यथ यस्तदात्मानस्तन्निष्ठास्तत्परायणाः ॥ गच्छ
न्त्यपुनरावृत्तिं ज्ञाननिर्धूतकल्मषा इत्यादिश्रुतिस्मृति
भ्यः ॥ ७ ॥ श्रीमत्स्वयंप्रकाशास्मद्गुरुणा करुणावशात्
उपदिष्टं पुरात्मैक्यं तत्त्वमावेदितं मया ॥ ब्रह्मेशविष्ण्वा
दिसमस्तदेवाः स्वस्वाधिकारेषु विभिन्नचित्ताः ॥ आत्मा

॥ ७३ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वशाद्यस्यवसंतिसर्वेतंकृष्णमाद्यंशरणंप्रपद्ये ॥ याभा
रतीशर्वविरिंचिविष्णुदेवादिभिर्नित्यमुपास्यमाना ॥ ता
मक्षमालाविलसत्कराग्रांवाग्वादिनींतांप्रणमामिदेवीं
॥ आकाशपुष्पमिवमिथ्याभिमंनिरीक्ष्यमग्नोस्मिनि
सस्फुरवबोधरसामृताब्धौ ॥ प्रत्यंचमद्वयमनंतसुखै
कबोधंसाक्षात्करोमिपरभावनयागुरूणां ॥ यत्पादयु
ग्मकमलाश्रयणंविनाहंसंसारसिंधुपतितःसुखदुः
खभाक्स्यां ॥ यत्पादयुग्मकमलाश्रयणात्सुतीर्णस्तद्दे
शिकांघ्रिकमलंप्रणतोस्मिनित्यं ॥ परमसुखपयोधौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥त०॥
॥७४॥

मग्नश्चित्तो महेशो हरिविधिसुरमुख्यान्देशिकं देहमात्रं
जगदपि न विजाने पूर्णसत्यात्मसंवित्सुखतनुरहमा
त्मा सर्वसंसारशून्यः ॥ यदुकुलवररत्नं कृष्णमन्या
श्च देवाश्च अनुजपशुमृगादीन्ब्राह्मणादीन्न जाने
॥ परमसुखसमुद्रे मज्जनात्तन्मयोऽहं ॥ गलितनि
खिलभेदः सत्यबोधैकरूपः ॥ इति श्रीपरमहंसप ॥७४॥
रिव्राजकाचार्य श्रीमत्स्वयंप्रकाशानंदसरस्वती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ त० ॥ विरचितं तत्वानुसंधानं नाम संपूर्णं ॥ श्रीकृष्णार्पण
॥ ७५ ॥ मस्तु ॥ श्रीरस्तु ॥ अपरं पुस्तकं वीक्ष्य शोधनीयं स
दा बुधैः ॥ न्यूनाधिको स्वरै वर्णैरस्माकं दूषणं नहि
॥ तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंधनात् ॥ मुर्ख
हस्ते न दातव्यं वै एवं वदति पुस्तकं ॥ २ ॥ मंगलं ले
खकानांच पाठकानांच मंगलं ॥ मंगलं भूमिपाला ॥ ७५ ॥
नां प्रजानां सर्वमंगलं ॥ श्रीगुरु परमात्मने नमः
॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

147

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥इतितत्वानुसंधानंसंपूर्णं॥

K K S U LIBRARY
RAMTEK
441 106
M-1838
Dist Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=15.10.20 11:07
,TRANSFERRED=2020/10/15 at 11:27:37
,PAGES=148
,TYPE=STD
,NAME=S0004006
,Book Name=M-1838-TATWANUSANDHAN
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection